नास्ति नक्षणत्वं तत्राह। अपूर्वमिति पूर्वं कारणं यस्य नास्ति तदपूर्वमकार्यमित्यर्थः॥ ५

बुद्धिग्राह्यं स्थूलं पृथिव्यादिग्राह्यत्वेनेमोम्भरत्वं तु महदादिसूक्ष्ममासीदेव नेत्याह एकमिति। सतोन्यन्नासीदेवे त्यर्थः तथा मृदो घटाकारपरिणामवत् कुलालवज्ञोपादानं निमित्तं सतोन्यदासीदित्याशंक्याह अद्वितीयमिति। सतो पि चिते विना प्रधानवन्न हेतुत्वमित्याशंक्य तत्त्वान्तरमुदाहृतं आत्मा वा इति। आप्नोतीत्यात्मा मूलकारणं वेशब्देन प्र सिद्धवस्त्वाभासयति। अवशिष्टम् तदर्थस्य निर्विशेषत्वार्थं अन्तरं तदेतदिति तच्छब्देन ईदृशमायामिरितिप्र कृतालोकः विधेयं ब्रह्मापेक्ष्य नपुंसकमेतद्ब्रह्मेत्यर्थः। परं कार्यं वास्तवं नास्तीत्यनपरमकारणमित्यर्थः अनंतरं जातं तेनरमनंतरालेनास्तीत्यनंतरमेकरसमित्यर्थः तथाविधमन्यदपि तद्रूपमस्तीति किं नेत्याह अबा ह्यमिति। बहिः प्रमेनात्मभूतमेवंविधमस्य नास्तीत्यबाह्यमद्वितीयमित्यर्थः तस्यापरोक्षतामाह अयमिति तत्सर्वसिद्धार्थं चित्स्वरूपत्वमाह सर्वेति ब्रह्मात्मना सर्वमनुभवतीत्यनुभूः अनुभाव्यस्य पृथक्त्वं नाद्वैत मित्याशंक्यत्यंतरं ब्रह्मेति। यत्पुरस्तात्पूर्वं प्राग्दिश्यपा ब्रह्मैवाविदुषां भाति तत्सर्वमिदमस्तं ब्रह्मैव वस्तु तद्इत्यर्थः एवं लौकिकवाक्यानां सिद्धेर्थप्रामाण्यमभ्युपगच्छतां वेदांतेषु विधिपरत्वं विना नपेक्षत्वफ लवत्वं च न लभ्यतेऽतिवदतां वेदांतेभ्यो ब्रह्मसिद्धिमनंगीकुर्वतां मतं ब्रह्मत्वेनानां तरागम्यत्वात्सिद्धव स्तुज्ञानं फललाभाद्ये पुत्रेणात्संगतिसिद्धे व्युत्पत्तिमनिच्छतामुपास्तिविधिद्वारा वेदांतेभ्यो ब्रह्मसिद्धिमिच्छ तां मतं निरासाय वर्णकांतरमारभ्यते तात्र वेदांता विधेयोपासनाविषयत्वेन ब्रह्म समर्पयंति उत साक्षादिति सिद्धे व्युत्पत्तिभावाभावाभ्यां संशये पूर्वपक्षः प्रवृत्त्यादिलिंगाभावान्नसिद्धव्युत्पत्तिः संभवतीति न सिद्धब्र ह्मपरा वेदांताः किंच प्रवृत्तिनिवृत्तिपरस्यैव शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्रत्वं च न संभवति नापि प्रयोज नवत्त्वमहं ब्रह्मास्मीति ज्ञाने सत्यपि प्रयोजनस्यादर्शनात् यद्येवं भूतज्ञानात्प्रयोजनसिद्धिस्तर्हि मनना

पुत्रेणा इत्या० निरस्तं

ते के

दविन्मनुतेतं स्वहंतमितिश्रुत्यास्वयंमानांतरनिषेधाच्च अनुमानेनत्वनुकूलंतर्केणोपयुज्यतेनस्वातंत्र्येणेत्यभिप्रा
यः। ननुयतोवाचोनिवर्तंतइतिश्रुतेर्वेदवेद्यत्वंकथमितिचेन्नलक्षणयावृत्तिविषयत्वेनशास्त्रयोनित्वाच्चे
त्यात्। विषयत्वेनाप्रमेयत्वमित्यविरोधात्। ३। पूर्वसूत्रेद्वितीयवर्णकेब्रह्मणःशास्त्रप्रमाणकत्वमुक्तंतदाक्षि
प्यसमाधीयतेतथाचाक्षेपसंगतिः फलंतुपूर्वपक्षेउपनिषदांमुमुक्षुप्रवृत्त्यनुपपत्तिः सिद्धांतेप्रवृत्तिसिद्धि
रितिवेदांताः कर्मशेषभूतकर्त्रादिपराः उतनित्यशुद्धबुद्धमुक्तब्रह्मपरावेतिसंशये। नब्रह्मपराः अप्रेयानुपा
देयसिद्धवस्तुपरत्वेनिष्प्रयोजनत्वसापेक्षत्वयोःप्रसंगात्तदुभयनिवारणायकर्तृदेवतादिप्रतिपादनद्वारा
कर्मपरत्वमितिप्राप्तेसिद्धांतः। तत्तुसमन्वयात्। ४। तुशब्दःपूर्वपक्षव्यावृत्त्यर्थः तद्ब्रह्मवेदांतेभ्युत्पत्त्यैवप्र
तिपाद्यतेकुतःसमन्वयात्सम्यगन्वयःसमन्वयःतस्मात् अनन्यशेषतयासम्यक्तात्पर्यवत्त्वंवेदांतानांकर्त्रादि
प्रतिपादकांतरेष्वप्रकरणस्थत्वात् नचप्रकरणभेदादुपासनाविधिपराइतिवाच्यं तत्त्वमस्यादीनांवि
धिरहितानांब्रह्मत्वमुपलब्धेःस्वरूपज्ञानादपिनार्थसर्वंइतिवदनर्थनिवृत्तेःप्रयोजनस्यसद्भावादपि
विधिशेषत्वकल्पनायोगात् नचसापेक्षत्वंरज्ज्वादिविद्वान्नब्रह्मणःप्रमाणांतरागम्यत्वेनतत्प्रतिपादक
वेदांतानांसापेक्षत्वाभावात् तस्मादुपक्रमादिलिंगैर्वेदांतानांब्रह्मपरत्वमेवेति उपक्रमादिकंचदृश्यते।सदे
वसोम्येदमग्रआसीदेकमेवाद्वितीयं आत्मावाइदमेकएवाग्रआसीत् तदेतद्ब्रह्मापूर्वमनपरमनंत
रमबाह्यं अयमात्माब्रह्मसर्वानुभूः ब्रह्मैवेदममृतंपुरस्तादित्यादिश्रुतीनामयमर्थः। सदित्यस्तिता
मात्रंबोध्यते एवेत्य[.]वधारणे किंतदवधार्यतेतदाह। इदमितिप्रतिदृश्यमानंजगत्तदग्रेउत्पत्तेःप्राक्
सदेवासीत् अव्याकृतंसत्कारणात्मकंसदेवासीदित्यर्थः हेसोम्यप्रियदर्शनेतिपित्रापुत्रःसंबुध्यते

वहुत
कर्त्रादानं
वदुत्यया
मवतितया

६

दितादधियेनेदं सर्वं विजानाति तं केन विजानीयादित्यादिना विदिक्रियाकर्मत्वप्रतिषेधात् नहितीयः तदेव
ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्युपासनाकर्मत्वप्रतिषेधात् अत्यर्थस्तु तद्ब्रह्म विदितात्कार्यादन्यदेव
अथो अपि अविदितात्कारणादप्यन्यदेव अधिउपरिष्टादप्यन्यदिति येन प्रमात्रा इदं सर्वं वस्तुलोको जानाति
तं केन करणेन जानीयात् करणस्य ज्ञेयविषयत्वात् ज्ञातर्यप्रवृत्तेस्तस्मान्न ज्ञाता ज्ञेयः किंतु साक्षीति यद्वाचानभ्यु
दितं येन वागभ्युद्यत इत्यविषयत्वमुक्त्वा तदेवेति प्रमात्रादेः कल्पनामपोह्य आत्मभूतं ब्रह्म महत्तममिति त्वं
विद्धि यदुपाधिविशिष्टं देवतादिकमिदमित्युपासते जनाः नेदं त्वं ब्रह्म विद्धीत्यर्थः इतश्च ब्रह्मणोऽकर्मत्वं गम

तस्यमतं

ते यस्यामतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां न हि दृष्टेर्द्रष्टारं पश्येर्न विज्ञातेर्विज्ञा
तारं विजानीया इत्यादि श्रुतयः अविषयत्वं बोधयंति यस्य ब्रह्म अमतं अविषय इति निश्चयः तस्य तन्मतं
सम्यक् ज्ञातं यस्य मतं विषयतया ज्ञातं शक्यं ब्रह्मेति धीः नासौ तद्वेद भेदधीमत्वात् एवमेवेति नियमार्थम्
उक्तार्थमनुवदति अविज्ञातमिति श्रुतिः विषयतया ज्ञातमेव ब्रह्म सम्यग्ज्ञातं विशेषज्ञानवतां ज्ञातमेव विषयतया
यथावदजानतामिति। बुद्धिमान् विषयतया न जानाति। मूर्खस्तु विषयतया जानातीति तात्पर्यार्थः। दृष्टेश्च
द्रष्टुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतनित्यदृष्ट्या व्याप्तारं दृश्यतया न पश्येः विज्ञा
तेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तथैव वेद्यतया विज्ञात्यान विजानीया इति मैत्रेयीं प्रति याज्ञ
वल्क्यवचनं। न त्वविषयत्वे कथं शास्त्रप्रमाणकत्वमिति चेन्न तज्ज्ञेन्यविद्याभ्रांतिध्वंसरूपातिशयप्र
त्वेन तद्विषयत्वसंभवादिति। किंचनतावद्विधेयक्रियायोत्पाद्यत्वं मोक्षस्य स्वरूपत्वेनानादित्वात् न
विकार्यं अविकार्योयमुच्यत इति स्मृतेः नाप्याप्यः नित्याप्तत्वात् नापि संस्कार्यः निर्गुणत्वे न गुण

६

हशब्दोऽव्यवधानेनसंबध्यतेसचास्मिन्दर्शनेस्थितःसर्वात्मभावप्रकाशकानहंमनुरभवमित्यादीन्मंत्रान्प्र
ददर्श। तत्रब्रह्मधीर्नविधेयातत्फलंचनवेद्यमितिगम्यतेतथाहि त्वंहिनःपितायोऽस्माकमविद्यायाःप
रंपारंतारयसि। श्रुतंह्येवमेभगवद्दृशेभ्यस्तरतिशोकमात्मविदिति सोहंभगवःशोचामितंमांभग
वान्शोकस्यपारंतारयत्वितितस्मैमृदितकषायायतमसःपारंदर्शयतिभगवान्सनत्कुमारःइत्याद्याः
श्रुतयोब्रह्मविद्यायाःअविद्यानिवृत्तिद्वारामोक्षहेतुत्वंदर्शयंति। अविद्यानिवर्तकत्वंच प्रमाणवस्तुपरतं
न्त्रज्ञानस्यैवेति। नविधेयाब्रह्मविद्यातत्फलंचनविधेय[illegible]मिति श्रुतीनामेवार्थः भरद्वाजादयःषड्
मोक्षार्थे ऋषयःपरविद्याप्रदंपिप्पलादाख्यंगुरुंविद्यानिष्क्रयार्थमन्यदननुरूपंपश्यंतःपादयोःप्रणम्योचिरे
त्वंहिनःपितेति त्वंखल्वस्माकंपिताब्रह्मदेहस्याजरामरस्याविद्यया जनयितृत्वात्पितरौतुहेयमात्रमेवजनयतःअतो
ताःजनयितृत्वमपिसिद्ध्यैवाविद्यानिरासादित्याह।यस्त्वमस्मानविद्यामहोदधेःपरंअपुनरावृत्तिरूपंपारंता
रयसिप्रापयसि विद्याप्लवेनेति। श्रुतंह्यस्यादितारयत्वित्यंतमुपसन्नमस्यंशोकसमुपसंतारयस्यमितिभेदः। मेमया
भगवद्दृशेभ्यःभगवत्तुल्येभ्यः श्रुतमेवयदात्मवित्शोकंमनस्तापंअकृतार्थबुद्धिंतरतीति सोहंमनात्मवित्शो
चामि अतस्तंमांशोचंतंशोकसागरस्यपारमंतंतारयतुप्रापयतु भगवानात्मज्ञानोडुपेनेति नारदेनप्रेरितः
सनत्कुमारस्तस्मैनारदायमृदितकषायायवैराग्यादि नाक्षालितरागादिसमस्तदोषायतमसःअ
विद्यायाःपारंपरमात्मतत्त्वंदर्शितवानिति। ननुब्रह्मैवविधेयमस्तुमुक्तेःफलस्यसत्त्वान्नचब्रह्मणो। कारकत्वा
दविधेयत्वंब्रह्मवेदब्रह्मैवभवतीत्यादिनाकर्मत्वप्रतीतेरितिचेन्नफलासंभवात्कृत्वाब्रह्मणःकृतिसाध्यत्वाभावेनविधे
यत्वानुपपत्तेः नचापिकर्मत्वेकिंविदिक्रियाकर्मत्वमुतोपासनाकर्मत्वंनाद्यः। अन्यदेवतद्विदितादथोअवि

१

पुंल्लिंगत्वेन नेयाः सः पर्यगात् शुक्रो दीप्तिमान् अकायो लिंगशरीररहितः अव्रणः अक्षतः अस्नावि
रः अनाडिरः आभ्यां स्थूलशरीराभावः शुद्धः अविद्यादिमलरहितः अपापविद्धो धर्माधर्मविधुर
इति तस्मान्न संस्कार्यो मोक्षः तस्मान्न कर्तव्यविधिशेषतया ब्रह्मोपदेशसंभवः यत्तु सिद्धे वस्तुनि प्रवृत्त्या
दिलिंगाभावान्न शक्तिग्रह इति तन्न प्रवृत्तिनिवृत्त्योरेव लिंगमिति नानिर्बंधः पुत्रस्ते जात इत्यादौ हर्षादिलिंगे
नापि शक्तिग्रहसंभवात् यत्तु प्रवृत्त्यादिपरस्यैव शास्त्रत्वमिति तदपि न हितशासनाद्धि तान्तांशास्त्रत्वोपपत्तेः
नापि फलाभावः ब्रह्मात्मसाक्षात्कारस्य मोक्षफलकत्वात् तदर्थं साक्षात्कारार्थं मननादि सार्थकं चेति नन्व
यं चिदपि विधिप्रवेशः ब्रह्मात्मावगतेः प्रवृत्त्यादिनिपेक्षया मोक्षहेतुत्वं श्रुतिरपि दर्शयति आत्मानं
चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति अयं परमात्माहमस्मी
त्यपरोक्षतया यदि कश्चित्पुरुषो विजानीयात् आत्मसाक्षात्कारदौर्लभ्यं द्योतयति चेच्छब्दः सः स्वातिरिक्त
मात्मनः किं फलमिच्छन् कस्य वा पुत्रादेः कामाय फलाय तदलाभेन शरीरं तप्यमाने अनु तदुपाधिः सन्संज्वरेत्त
प्येतेति नन्वशरीरत्वाख्यमोक्षस्य स्वाभाविकत्वं सिद्धवत्कृत्य न धर्मजन्यत्वमित्युक्तं तदयुक्तं शरीरदशाया
म शरीरत्वस्याभावेन धर्मजन्यत्वसंभवादिति चेन्न सशरीरत्वस्य मिथ्यात्वेनाशरीरत्वस्य स्वाभाविकत्वात्
तथा च ब्रह्मविद्विषया श्रुतिः तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायम
शरीरोऽमृतः प्राणो ब्रह्मैव तेज एवेति सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव स
प्राणोऽप्राण इवेति च अतएवाश्रुत्या अहं ब्रह्मास्मीति ज्ञाने सत्यपि मुक्तिर्न दृश्यते किंतु यथापूर्वं संसारित्वमे
वेति शंकापि परिहृता भवति अशरीरत्वं तु अत्र ब्रह्म समश्नुत इति पूर्ववाक्ये जीवन्मुक्तिरुक्ता सजीवन्मुक्तो

धानं च क्षणसंस्काराभावात् नापि दोषापनयः संस्कारः संभवति ब्रह्मणि क्रियायाः अभावेन स्वनिष्ठक्रियया
दोषापगमायोगात् अन्यनिष्ठक्रियया अन्यसंस्कारायोगात् न च देहनिष्ठक्रियया आत्मनि संस्कारो दृष्ट
इति वाच्यं देहादिसंहतस्य तन्निष्ठक्रियया तस्यैव संस्कार्यत्वं तत्फलभोक्तृत्वं चेत्यवगमात् तथा च श्रुतिः आ
त्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति आत्मा शरीरी आत्मेत्युच्यते तथा च शरीरादिसंयुक्तमा
त्मानं भोक्तेति मनीषिण आहुरित्यर्थः यद्वा आत्मा भोक्तेत्याहुः संबंधः इन्द्रियेत्यादि क्रियाविशेषणं।
आत्मनि दोषाभावाच्च न दोषनिवृत्तिः संस्कारः संभवति निर्गुणत्वे निर्दोषत्वे श्रुतिरेव मानं तथाहि एको
देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुण
श्च सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति अनयोरयमर्थः मूर्त्तित्रयस्य ब्रह्मरु
द्रादात्मनो भेदं प्रत्याह एक इति जाड्यं प्रत्याह देव इति ज्ञानघन इत्यर्थः आदित्यादिवैषम्यमाह सर्वेति
तर्हि किमिति न प्रतीयते तत्राह गूढ इति अनादिमायया छन्न इत्यर्थः तत्र तत्रावच्छिन्नत्वेन परिच्छिन्नत्व
न्नेत्याह सर्वव्यापीति नभोवत्ताटस्थ्यं वारयति सर्वभूतेति सर्वेषु भूतेष्वन्तःस्थितस्तत्तन्नियामकः एवं नास्ती
त्याह कर्मेति सर्वकर्मसाक्षीत्यर्थः सर्वभूतेष्वित्यादिना भूतानां पृथग्गुणैः सद्वितीयत्वमाशंक्याह सर्वेति।
सर्वेषां भूतानामधिवासोऽधिष्ठानं न च कल्पितमधिष्ठानादर्थान्तरमित्यर्थः न केवलं कर्मणामेवाध्य
क्षः अपि तु तत्कर्तॄणामपीत्याह साक्षीति साक्षित्वे हेतुमाह चेतेति चित्स्वभाव इत्यर्थः केवलो द्वयवर्जि
तः अद्वितीयः निर्गुणो ज्ञानादिगुणरहितः चकारो दोषाभावसमुच्चयार्थः गुणदोषाभावे मन्त्रान्तरं सपर्य
गादिति सः यस्तु सर्वाणि भूतानीति प्रकृतात्मा परितः समन्तादगात् सर्वतो गत इत्यर्थः शुक्रमित्यादि शब्दाः

श्वेत् हे श्वेतकेतो श्वेतकेतो नाचेत्तनोऽसीति तदा शास्त्रप्रमाण्यादचेतनोऽस्मीति ध्यायमानो मोक्षात् व्याहन्येत अन
र्थं चेयात् तथा च शास्त्रमुन्मत्तप्रलापो भवेत् तच्चानिष्टं तस्मादात्मशब्देनात्र तत्पर इति। कथापरोक्षप्रतिबंध
रा कनिवृत्तिमाह श्रुतिश्चार्थवतीति तद्रूपमित्यादि सर्वं बंधनिवृत्त्यादेरादिष्टेरपि निवृत्तिप्रसंगोऽपारंपर्येक
द मेणातं दृष्टान्तु वृत्तिमाह तस्येति कथं तर्हि पारंपर्यक्रमेण निवृत्तिरित्याशंक्य भोगादित्याह यावदिति प्रार
ब्धध्वस्तावपि कथं देहादिध्वंस इत्याशंक्याप्रतिबंधादित्याह अथेति उत्तमपुरुषस्त्वमयत्र प्रथमपुरुषे छांद
सत्वादिति ७ ननु स्थूलारुंधतीन्यायेन प्रधानोपदेशद्वारा आत्मोपदेशोऽयमस्तु तत्राह हेयत्वाच्चेनाज्ञा
ते यद्यनात्मैव प्रधानं सच्छब्दवाच्यं स आत्मा तत्त्वमसीति इहोपदिष्टं स्यात्। तदुपदेशश्रवणादनात्मज्ञत
या तन्निष्ठो माभूदिति मुख्यमात्मानमुपदिदिक्षु शास्त्रं तस्य हेयत्वं ब्रूयात् यथारुंधतीं दिदर्शयिषुस्तत्समीप
4 स्थूलताराया हेयत्वं ब्रूते तद्वदित्यर्थः एकविज्ञानात्सर्वविज्ञानोपक्रमविरोधसमुच्चयार्थ अपशब्दः उत तम तयाहि
देशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति। कथं नु भगवः स आदेशो भवतीति यथा सो
विज्ञातेन म्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं एवं सोम्य स आदे
शो भवतीति वाक्ये एकविज्ञानात्सर्वविज्ञानोपक्रमः श्रूयते स विरुध्येत प्रधानज्ञाने तद्विकारज्ञानेऽपि भोक्तृवर्ग न
ज्ञानासंभवादिति अस्यार्थस्तु हे श्वेतकेतो येनाश्रुतेन शास्त्रतोऽन्यदश्रुतमपि श्रुतं भवति येन मतेन तर्कितोऽन्यद
मतमपि मतं येन विज्ञातेनान्यदविज्ञातमपि विज्ञातं भवति तमादेशं आदिश्यते इत्यादेशः शास्त्राचार्योपदेशग
म्य वस्तु वः प्राक्ष्यः पृष्टवानसि त्वमाचार्यमिति पितुर्वाक्यार्थः अन्यज्ञानादन्यन्न ज्ञेयमिति पुत्रो ब्रूते कथं नु भग
वः इति कार्यस्य कारणानन्यत्वमित्याह यथेति ज्ञातेऽपि मृत्पिंडे कथं तद्विकारधीरित्यत आह वाचेति योवि

सूक्ष्मः

देशंकाशंकः नचाश्रेज सो गौणेति लक्षणाश्रवणात्तस्याप्रपठितत्वेन तदेसनेत्यादौ गौणो लक्षणमेवेति वाच्यं
संज्ञापरस्यैव लक्षणपाठस्यानिश्रापकत्वात् प्रकृते तु गौणमुख्ययोर्गौणस्य जघन्यत्वेन संज्ञाया भावा
त् अत एव भगवान् जैमिनिः विरोधे प्रायदर्शनादिति संज्ञापरस्य लेप्रायदर्शनस्यानिश्रापकत्वमाह
अग्नेर्जसोस्तु नैवं मुख्यत्वे किंचित्कारणमस्तीति गौणमीक्षणं कूलं पिपतिषतीतिवत् अत्यर्थस्तु आ
काशं वायुं च स्रष्टा तत्स देवेत्युपक्रान्ते सच्छब्दवाच्यं ब्रह्म तेजः स्रष्टृवदिति प्रकृतसदात्मपरामृ
श्यते सेयमिति संनिहिते क्षित्यपरामर्शात् देवतेति अलौकिकमुक्तमीक्षणमभिनयति हंतेति स
च्छिवाकेनोक्तानि ते जीवनानि प्रवेशाति इमा इति सूक्ष्मभूतानि तिस्रो देवता मया सृष्टा इत्यर्थः सूक्ष्मत्वेन प
रोक्षत्वाद्देवताशब्दप्रयोगः तासां व्यवहारांगत्वं कथमित्यत आह अनेनेति अनेन पूर्वसृष्टानुभूतेन प्रा
णधृतिहेतुना जीवेनात्मना तद्रूपेण तो देवतास ... नंतरं नामरूपं चेति विस्पष्टमात्मता ... रवाणीति
परा ... देवते सतवतीत्यर्थः यः सदाख्यः सत्यो ... रित्यर्थः बुद्धिस्थे यद्यतियावत् एतदात्म्य
तदात्मकं भावभवितव्यो ... दात् परं सूक्ष्मं सर्वात्मकं सदेव सत्यं पारमार्थिकं तत्त्वं स एव सर्वस्यात्माति
रूपं चरितस्वरूपं हे श्वेतकेतो त्वं च संसारी नासि किंतु तदेव ब्रह्मेत्यक्षरयोजना ६ नन्वात्मशब्दोपि प्र
धाने गौणस्तु नानार्थकत्वात् मुख्यो वेत्यत आह तन्निष्ठस्य मोक्षोपदेशात् ।७। न प्रधानमात्मशब्दवा
च्यं तस्य त्यस त्यात्मेति प्रकृतं सदणिमानं आदाय तत्त्वमसि श्वेतकेतो इति श्वेतकेतो ... तस्य मोक्षपि
तव्यस्य तन्निष्ठतामुपदिश्य आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य
इति मोक्षोपदेशात् यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं मुमुक्षुं श्वेतकेतुं चेतनं तत्त्वमसीति शास्त्रं ग्रा

नैकासंपदुपात्तिः पूर्वपक्षे सिद्धांतेतु ब्रह्मैवोपास्यमिति इति विवेकः एवं हि श्रूयते सदेव सोम्येदमग्र
आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तन्न प्रधानस्य चोपक्रमे ईक्षितृत्वश्र
वणाद्विरुध्येत ईक्षणस्य चेतनधर्मत्वात् न च प्रमाणोज्ञानक्रियाशक्त्यभावः अविद्यामहिम्ना सर्व
ख्याप्युपपत्तेः सत्यं प्रधानपरमाणुप्रेरक ईश्वरः सद्वितीय ईक्षितेति पातंजल्यादिमतनिराकरणा
र्थं श्रुतावेकमितिपदं उपादानस्य चेतनत्वार्थं तदैक्षतेति उपादानत्वार्थं बहु स्यामिति एवमैतरेयश्रुतिः
आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ऐक्षत लोकान्नु सृजा इति स इमांल्लोकानसृ
जतेति ईक्षणपूर्विकामेव सृष्टिमाचष्टे प्रश्नवतस्त्वाक्रांतमिति यावत् एवं सर्वत्रेक्षणपूर्विका सृष्टिश्र
वणाद्ब्रह्मैव जगत्कारणमिति ५ ननु ईक्षणमात्रेण न ब्रह्म जगत्कारणमिति निश्चयः तत्तेज ऐक्षतेत्यत्रा
प ऐक्षंतेत्यचेतनयोरप्यप्तेजसोरीक्षणश्रवणात् तस्मात्प्रधानेपि ईक्षितिर्गौणी इति प्राप्ते उच्यते
गौणश्चेन्नात्मशब्दात् ६ अप्तेजसोरिव प्रधाने ईक्षतिर्गौणी इति चेन्न कुतः आत्मशब्दात् आत्मशब्दश्रवणा
दित्यर्थः सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत तत्तेजोसृजतेति तेजोबन्नानां सृष्टिमुक्त्वा तदेव प्र
कृतं सदीक्षितृ तानि च तेजोबन्नानि देवताशब्देन परामृश्याह सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता
अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिः तत्र यदि चेतनं प्रधानमेवेक्षितृ तदा से
यं देवतेति तस्यैव परामर्शात् तदात्मत्वेन जीवकीर्तनमनुपपन्नं स्यात् आत्मा हि स्वरूपं न च चेतनो जीव अचेतन
स्यात्मा भवितुमर्हति जीवविषय आत्मशब्द उपपद्यते स य एषोणिमैतदात्म्यमिदं सर्वं तत्सत्यं स
आत्मा तत्त्वमसि श्वेतकेतो इति श्वेतकेतो जीवस्यात्मतादात्म्योपदेशात् न हि चेतनस्य चेतना मे

देहस्थोपि पूर्ववन्न संसरतीत्यत्र दृष्टांतमाह तद्यथेति तत्र जीवन्मुक्तदेहे ईदृशो देहे दृष्टांतो यथेति य
था लोके अहिनिर्ल्वयनी सर्पनिर्मुक्तत्वक् वल्मीके प्रत्यस्ता प्रक्षिप्ता मृता पूर्वमिव सर्पेण आत्मत्वेनागृही
ता वर्तते एवमेवेदं विदुषः शरीरं प्राणिवात्मत्वेनागृहीतं तिष्ठतीत्यर्थः त्वचासाम्यं शरीरस्योक्त्वा
सर्पसाम्यं विदुषो दर्शयति अथेति तथार्थको थशब्दः यथा प्रत्यस्तां त्वचं सर्पो हमिति नाभिमन्यते
तथायं जीवन्मुक्तो देहस्थोपि न तत्राहमिति प्रमाद्यतीत्यशरीर अशरीरत्वादेवामृतः देहाभिमान
वतो हि मृतिः तिरः प्राणिकः सत्त्वात् इति जीवतीति प्राणः साक्षाच्चक्षुरेव तच्च तेजो विज्ञानज्योतिः
अनयाः स्थूलदेहस्य मिथ्यात्वं दर्शयित्वा सचक्षुरचक्षुरिति लिंगशरीरस्य मिथ्यात्वं दर्शय
ति वस्तुतः चक्षुरपि बाधितचक्षुराद्यनुवृत्त्या सचक्षुरिवेत्यादियोजना तस्माद्वेदांताः साक्षादेव ब्रह्म
णि समन्वितान विधिद्वारेति सिद्धं ब्रह्म स्वतंत्रमेव शास्त्रप्रमाणकमिति ४ एवं चतुर्भिः सूत्रैः सर्व
ज्ञं सर्वशक्ति जगत्कारणं वेदांतप्रतिपाद्यं ब्रह्मेत्युक्तं वस्तुतत्स्वरूपेणस्य चेतनमचेतनं वेति संशयः तत्र सांख्याः
कूटस्थब्रह्मणो ज्ञानक्रियाशक्त्यभावान्न जगत्कारणत्वं प्रधानस्य तु सत्त्वात् जगत्कारणत्वं सत्त्वगुणमा
दाय ज्ञानशक्तिमत्त्वं त्रिगुणत्वात् क्रियाशक्तिमत्त्वं ब्रह्मण एकत्वान्न क्रियाशक्तिः तस्मात्सर्वज्ञं सर्व
शक्ति प्रधानमेव तदनुवादका वेदांताः इति वदंति तन्मतनिरासार्थमिदं सूत्रमारभ्यते ईक्षतेर्नाश
ब्दं ॥ सांख्यपरिकल्पितं प्रधानं जगत्कारणं न भवति नञ् श्रेतुरशब्दमिति हेतुगर्भविशेषणमेतत्
अशब्दत्वात् वेदप्रमाणकत्वात् इत्यर्थः वेदाप्रमाणकत्वे हेतुः ईक्षतेरिति धातुवाच्यके सति
शब्दो लक्षणया धात्वर्थलक्षणपरः इति तत्रश्रवणादित्यर्थः अस्य चाक्षेपसंगतिः फलं च प्रधा

प्रसंगार्थश्च ततः इति विप्रतिषेधः न नानागतित्वेन हि श्रोविप्रसृताः स्युः प्राणाश्चक्षुरादयः यथा पतनं यथा गोल
कं विप्रतिषेधं ते विविधमुद्वहंतीति यावत् प्राणेभ्यो नंतरमादित्यादयो देवास्तदनुग्राहकास्तेभ्यो नंतरं लोकाः
ते इति लोका विषया भवंतीत्यर्थः प्राणेर्हिरण्यगर्भः ।१०। किंच श्रुतत्वाच्च ।११। स्वशब्देनैव सर्वज्ञेश्वरो जगतः
कारणमिति श्रूयते श्वेताश्वतराणां मंत्रोपनिषदि ज्ञः कालकालो गुणी सर्वविद्य इति सर्वज्ञमीश्वरं प्रकृत्य
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति ज्ञः सर्वज्ञः स कारणमिति कारणत्वोक्तेः सर्व
ज्ञत्वविशेषतः सर्वविद्यः सः सर्वज्ञः कारणं तस्य सर्वेश्वरत्वमाह करणेति करणानींद्रियाणि तेषामधिपाः स्वा
मिनो जीवास्तेषामधिपः परमेश्वरः तस्य सर्वहेतुत्वमाह न चेति सर्वजीवान् प्रति ईश्वरत्वं हिरण्यगर्भस्या
प्यस्तीति ततो विशेषमाह न चाधिप इति तस्य नियंता स्वयं न स्य नियंतास्तीत्यर्थः तस्मात्सर्वज्ञं ब्रह्म जगत्कारणं नाचेत
नं प्रधानमन्यद्वेति सिद्धं अस्मिन्नधिकरणे गुणसूत्राणि षट् नन्वेवमथातः इत्यारभ्य श्रुतत्वाच्चेत्येतदंतैः सू
त्रैः सर्वेषां वेदांतानां सर्वज्ञे सर्वशक्तौ ब्रह्मणि परत्वं समर्थितं किमपरमवशिष्टं यदर्थमुत्तरसूत्रसंदर्भ इति उच्य
ते निर्विशेषब्रह्मणः स्वरूपेणोपदेशायोगात् किंचिदुपाध्युपहितत्वेनोपदेश इति वक्तव्यं तत्र कस्मिन्वा कोऽप्युपा
धिर्विवक्षितः कस्मिन्वा केन विवक्षित इत्याकांक्षायां तद्विवेचनार्थमुत्तरसूत्रसंदर्भोर्थवानिति तथैव सविशे
षं निर्विशेषं च ब्रह्म श्रूयते यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति अथ यदल्पं तन्मर्त्यं सर्वाणि रूपा
णि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते इत्यादि सविशेषवाक्यानि अथ यत्रान्यत्पश्यति अन्यच्छृणोत्यन्य
द्विजानाति तदल्पं यो वै भूमा तदमृतं यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् यत्र नान्यत्पश्यति नान्यच्छृ
णोति नान्यद्विजानाति स भूमा निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं अमृतस्य परं सेतुं दग्धेंधनमिवानलं

कारः स्वावागालंबनमुच्यते परं न वस्तुतोऽस्तीत्यर्थः तत्र हेतुः नामधेयमि ति नाममात्रमेव नास्तीत्यर्थः तर्हि मृद्
घटयोरभेदे घटनाशे मृदोऽपि नाशः स्यादत आह मृत्तिकेति घटो मृद्भिन्नत्वेन निर्वक्तुं न शक्यत इति सत्तोऽभि
न्न एव मृत्तु घटाद्भिद्यत इति न दोष इति। एवं सदेव सोम्येति सच्छब्दवाच्यं प्रधानमित्योपि न भवतीत्याह।
स्वाप्ययात्।९। तदेव सच्छब्दवाच्यं कारणं प्रस्तुत्य श्रूयते यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो
भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीत्येषा श्रुतिः पुरुषस्य लोकप्रसिद्धं स्वपि
तिनाम निर्वक्ति स्वशब्देन सच्छब्दवाच्यात्मा परामृश्यते स्वमप्यपीतो भवति लीनो भवति अपिपूर्वस्यैतेर्ल
यार्थत्वात् सुषुप्तावस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवतीत्युच्यते त
था च सूत्रार्थः स्वस्मिन्नुक्तेः सच्छब्दवाच्यात्मनि अप्ययात् लयश्रवणादिति तत्र यदि प्रधानमेव स्वशब्देनो
च्येत तदाचेतनोऽचेतनमप्येतीति विरुद्धं स्यात् श्रुत्यंतरं च तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वे न
द नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति सुषुप्तावस्थायां चेतनेऽप्ययं द
दर्शयति अतोऽपि नाप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगत्कारणं।९। किंच गतिसामान्यात्
।१०। गतेः सर्वेषु वेदांतेषु चेतनकारणावगतेः समत्वादित्यर्थः नहि क्वचिदपि विरुद्धमुपलभ्यते क्वचिद
चेतनं कारणं क्वचिच्चेतनमिति किंतु सर्वत्र चेतनमेव कारणमुपलभ्यते यथाग्नेर्ज्वलतः सर्वा दिशो वि
स्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका
इति तस्माद्वा एतस्मादात्मन आकाशः संभूतः इति आत्मन एवेदं सर्वमिति आत्मन एष प्राणो जायत इत्याद्या
श्रुतय आत्मन एव कारणत्वं दर्शयंति आत्मशब्दश्चेतनपर इत्युक्तं यथाग्नेरित्यादेरयमर्थः विस्फुलिंगा

सं
स्मि

भवति यत्र तु श्रूयमाणोपि गुणो न विवक्षितस्तद्वाक्यं ज्ञेयब्रह्मपरमेवेति निर्णयार्थमुत्तरसूत्रसंदर्भ इ-
ति फलितं ॥११॥ आनंदमयोऽभ्यासात् ॥१२॥ पूर्वं तावत्सर्वेषां वेदान्तानां निर्गुणब्रह्मपरत्वमुक्तं सर्गतः सिद्धं
तत्सगुणवाक्यादर्शनेनापोद्य सगुणवाक्यविचारः प्राप्तः तमपोद्येदमधिकरणं निर्गुणविचारात्मक-
मारभ्यते यद्यप्यपवादापवादकत्वादस्य सगुणविचारानंतर्यं युक्तं तथापि पूर्वाधिकरणे संशयाभावात्प्राय-
पाठेन निश्चायकत्वमुक्तं अन्योन्तर आत्मानंदमय इत्यत्र मयटो विकारप्राचुर्ये च मुख्यत्वात्संशये विका-
रप्रायपाठो निश्चायको नेति पूर्वाधिकरणसिद्धान्तयुक्त्याभावेन प्रत्यवस्थानत्वात्तदुदाहरणलक्षणसंगति-
रस्तीति सगुणविचारात्प्रागिदमारभ्यते पूर्वपक्षे जीवस्यानंदमयत्वेनोपास्तिफलं सिद्धान्ते तु निर्गुणब्रह्मप्रमि-
तिरिति सिद्धान्तोऽन्य एकदेशी मतेन मयट्त्रोपास्तिरिति विवेकः तैत्तिरीयके अन्नमयप्राणमयमनोमयवि-
ज्ञानमयकोशांश्च तुल्यपाठेनेतरं तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानंदमय इति श्रूयते तत्र सं-
शयः किमानंदमयशब्देन सत्यं ज्ञानमिति प्रकृतं परं ब्रह्मोच्यते उतान्नमयादिविकारवद्ब्रह्मणोऽर्थान्तरं जी-
व इति तत्रान्नमयादिविकारप्रायपाठात्तस्य प्रियमेव शिरः मोदो दक्षिणः पक्ष इत्यादिना प्रियाद्यवयवयोगा-
त्तस्यैष एव शारीर आत्मेति शा…री रत्वश्रवणाच्च जीव इति प्राप्ते तस्य पूर्वोक्तस्य विज्ञानमयस्य एष आनं-
दमय एव शारीर आत्मेति श्रुत्यर्थः एवं प्राप्त उच्यते आनंदमयोऽभ्यासात् आनंदमयः परमात्मा भवितु-
मर्हति कुतः अभ्यासात् आनंदमयशब्दस्य ब्रह्मण्येव बहुकृत्वोऽभ्यासादित्यर्थः तथाहि आनंदमयं प्रस्तु-
त्य रसो वै सः इति तस्यैव रसत्वमुक्त्वोच्यते रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात्कः प्राण्यात् यदे-
ष आकाश आनंदो न स्यात् एष ह्येवानंदयाति सैषानंदस्य मीमांसा भवति एतमानंदमयमात्मान-

स एष नेति नेत्यात्मा स्थूलमनण्वित्यादिनिर्विशेषवाक्यानि ब्रह्मणो हि रूपतां दर्शयंतीति तत्र कानिचि अमुत्रार्थान्यु
पासनानि कानिचिदभ्युदयार्थानीति बोध्यं अत्यर्थस्तु यत्र यस्यां त्वविद्यावस्थायां तुच्छमपि द्वैतं सदिव
भाति तत्रेतरः संसारी सन्नितरं रहितं पशुपतिं द्रष्टा दृशिगोचरमुपास्यं वदतीत्यर्थः यस्मिन्नात्मनि द्रष्ट्रा
दिव्यवहारादिनानुसंधत्ते तदन्यं परिच्छिन्नमुपहितमिति यावत् मुमुक्षुःस्वस्य च विशेषांतरमाह यो वा इति अयेति
घोतितो विशेषो तेनस्य कदितः सर्वज्ञ ईश्वरो नामरूपादिकं विसृजति मीयत तत्र प्रविश्य जीवरूपेणाभिवदना
दि कुर्वन्यो वर्तते अंतर्यामीतं विद्वानिहैवामृतो भवतीत्यर्थः यत्र यस्यां विद्यावस्थायामस्य विदुषः सर्वं
कर्त्रादि आत्मातिरेकेणासदेवासीत्तत्र केन करणेन कं विषयं को वा कर्ता पश्येदित्याक्षेपाद्व्यवहाराभावो
पाधिकं तत्त्वमित्यर्थः यत्र भूम्नि स्थितो विद्वानन्यद्दृश्यं चक्षुषा न पश्यति अन्यच्छ्रोतव्यं श्रोत्रेण न शृ
णोति न चान्यन्मंतव्यं ज्ञातव्यं वा मनसा बुद्ध्या वा मनुते जानाति स भूमा द्रष्ट्राद्यगोचरो निरतिशयमहत्त्वसंप
न्नः परमात्मेत्यर्थः निष्कलं निरंशं अतएव निष्क्रियं निष्क्रियत्वादेव शांतं परिणामरहितमतएव निरवद्यं रागा
दिरहितं धर्मादिरहितं निरंजनमित्यर्थः यद्वा निष्कलत्वान्निरंजनं जडसंबंधशून्यमित्यर्थः यथा महार्णवः

मूल सेतुर्नदीकुल्यादिपरिप्राप्तिरूपायः तथा संसारसागरस्य परं ब्रह्म तद्भावप्राप्तस्यामृतस्य वा कोऽत्यनुज्ञाभिव्यक्तं तस्मा
घनं सेतुवद्वस्थितेर्वा को हस्तज्ञानस्य कथं नाशस्तत्राह दग्धेति यथा दग्धेंधनो ग्निः शाम्यति तथा ज्ञानमपीत्य
र्थः इतीदमपि इदं न इदं नेति नि[illegible]विधिमूलमात्मेत्यर्थः तथा सविशेषनिर्विशेषपरं वाक्यांतरमपि न्यू
नमन्यत्स्यानंतं पूर्णमन्यदिति अस्यार्थः निष्प्रपंचादन्यदुपास्यगुणानां स्थानं न्यूनं परिच्छिन्नं ततोऽन्यन्नि
ष्प्रपंचं मुक्तोपसृप्यं त्रिधा परिच्छेदशून्यं तच्चिदानंदं मिति एवं च यत्र त्वस्य गुणा वाक्ये गुणविवक्षा तत्रोपासना

संपूर्णमपरिच्छिन्नं १

र आत्मानंदमय इति गीयते मंत्रब्राह्मणयोरैकार्थ्यात् यच्चात्र व्याख्यानव्याख्येयभावाभावेन न मंत्रब्राह्मणभा
वस्तथापि ब्राह्मणस्य व्याख्यानरूपत्वेन व्याख्येयमंत्रं प्रत्युपायत्वात्प्रकृतेप्युपेयोपायभावोस्तीति मंत्रवर्णिकमि
त्युक्तं ॥१५॥ इतश्चानंदमयः परमात्मा न जीव इत्याह ॥ नेतरोनुपपत्तेः ॥१६॥ ईश्वरादितरो जीवो नानंदमयः कुत
ऽनुपपत्तेः सोकामयतेति सृष्टेः पूर्वमात्मनो बहुस्यां प्रजायेयेति स्रष्टृत्वं स तपोतप्यत स तपस्तप्त्वा इदं सर्व
मसृजतेति सृष्टिहेतुत्वं च श्रूयते तत्सर्वस्यानुपपत्तेरिति सूत्रार्थः जीवस्य ज्ञानस्य शरीरसाध्यत्वादीक्षणानुपपत्ति
र्व्याख्याता तपः शब्द ईक्षणपरः ॥१६॥ किंच भेदव्यपदेशाच्च ॥१७॥ नानंदमयो जीवः कुतः जीवानंदमययो
र्भेदेन व्यपदिश्यमानत्वादित्यर्थः तथा च श्रूयते रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीत्यानंदमयस्य लब्धव्य
त्वेन जीवस्य लब्धृत्वेन भेदव्यपदेशः नहि लब्धैव लब्धव्यो भवति ॥१७॥ नन्वानंदमयशब्देन प्रधानमुच्यतां
तत्राह ॥ कामाच्च नानुमानापेक्षा ॥१८॥ अनुमीयत इत्यनुमानं अनुमानेन गम्यं प्रधानमित्यर्थः आनंदम
यत्वेन कारणत्वेन वा प्रधानस्य नापेक्षा न स्वीकारः कुतः कामात् आनंदमयाधिकारे सोकामयतेति काम
यितृत्वश्रवणादित्यर्थः नह्यचेतने प्रधाने कामः संभवति ईक्षतेर्नाशब्दं इत्यत्र निराकृतमपि प्रधानं गतिसामा
न्यप्रपंचनाय पुनर्निराकृतमिति बोद्धव्यं ॥१८॥ अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥ इतश्च न जीवे प्रधाने वाने
दमयशब्दः यस्मादस्मिन्नानंदमये प्रकृते आत्मनि प्रबुद्धस्य जीवस्य तद्योगं तदात्मना योगं तद्भावापत्तिमु
क्तिं शास्तीत्यर्थः तच्छास्त्रं तस्मादित्यर्थः यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सो
भयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति शास्त्रं अस्यार्थः यस्यामेकाज्ञा
नावस्थायामेष विद्वानेतस्मिन्ब्रह्मणि पंचीकृतभूतपंचकेन तत्कार्येण समष्टिस्थूलदेहेन विराजा दृश्य

क
ते
गतिसामा वेदांतानां समन्वयप्रदर्शनाय सामान्यप्रपंचनाय
शास्ति
भयं
पा

प्राप्नोति

मुपसंक्रामति आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति आनंदो ब्रह्मेति व्यजानादिति च कृत्स्नाभ्यासः श्रू-
यते न चानंदपदस्यैवाभ्यासो नानंदमयपदस्येति वाच्यं वसंते वसंते ज्योतिषा यजेतेत्यत्र ज्योतिःपदस्य ज्यो-
तिष्टोमपरत्ववत् आनंदपदस्यानंदमयपरत्वात् अत्यर्थं तु रसः सारः आनंदयुक्तः अयं जीवः
पूर्णानंदः सर्वसाक्षी सर्वप्रेरको न स्याच्चेत्तर्हि प्राणादेरचेतनस्य चेष्टानयुक्तेत्याह कोह्येवेति अन्यात् जी-
वेत् प्राण्यात् निश्वसेत् यत् यदि आनंद इत्यनंतरं श्रेयः इति शेषः आनंदयितृत्वादपि परमानंदत्वमित्या-
ह एष ह्येवेति आनंदयतीत्यर्थः यातीति दीर्घश्छांदसः स्वयमनापरं प्रति नं करोति लोके तद्धि स्वयमानंदः
परमानंदयतीति प्रत्युत्पन्नपादादानंदमयस्यैव विकारित्वमिति तन्न स्थूलारुंधतीन्यायेनान्नमयादिविका-
रामुख्यात्मप्रदर्शनस्यात्मज्ञानार्थत्वेनानंदमयस्य सर्वांतरत्वात्सहवाक्येत्यवधारणात् अनंतरमन्य-
स्यात्मनोऽनुपदेशात्सर्वांतरत्वमवगम्यते विज्ञानकोशवशादेवाधिकप्रियाद्यवयवयोगो न विरुध्यते ब्र-
ह्मणोऽन्नमयादिकोशपरंपरया शारीरत्वमभ्युपपन्नमेव शारीरजीवे प्रतिबिंबत्वादीश्वरस्य तस्मादानंद-
मयः परमात्मा ॥ ११ ॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥ ननु नानंदमयं ब्रह्म कुतः विकारार्थकमयप्रत्यया-
त् ब्रह्मण आनंदविकारत्वानुपपत्तेरिति चेन्न कुतः प्राचुर्यात् मयटः प्रचुरे आनंदप्राचुर्यवाचकत्वादित्यर्थः
१३। मयटः प्राचुर्यार्थकत्वे हेत्वंतरमाह ॥ तद्धेतुव्यपदेशाच्च ॥ १४ ॥ तस्मानंदं प्रति ब्रह्मणो हेतुत्वव्यपदेशादि-
त्यर्थः एष ह्येवानंदयातीति ब्रह्मण आनंदहेतुत्वं व्यपदिश्यते योऽन्यानानंदयति स प्रचुरानंद इति प्रसिद्धं ॥ १४ ॥
इतश्चानंदमयः परमात्मेत्याह ॥ मांत्रवर्णिकमेव च गीयते ॥ १५ ॥ ब्रह्मविदाप्नोति परमित्युपक्रम्य स-
त्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामित्यस्मिन्मंत्रे सर्वांतरत्वेनोक्तं तन्मांत्रवर्णिकं ब्रह्म अन्योंऽत

विकारशब्दान्नेति चेन्न प्राचुर्यात् विकारशब्दादवयवपरपुच्छशब्दान्न तत्समानाधिकरणं ब्रह्मपदं स्वप्रधानब्र
ह्मपरमिति चेन्न कुतः प्राचुर्यादवयवशब्दोपपत्तेः प्राचुर्यं चात्रावयवप्रायप्रयोगः एवं चान्नमयादीनां
पुच्छांतानवयवानुक्त्वानंदमयस्यापीतरावयवोक्तौ पुच्छस्य बुद्धौ सन्निधानादपुच्छमपि ब्रह्म पुच्छमित्युक्तं
श्रुत्या नहि ब्रह्मणो मुख्यं पुच्छत्वमानंदमयस्य परमात्मत्वपक्षेपि युक्तं स्वं प्रति स्वस्य पुच्छत्वानुपपत्तेस्तस्माद्ब्र
ह्मपुच्छवत्पुच्छं सर्वाधिष्ठानं प्रतिष्ठा परायणं लौकिकस्यानंदजातस्याधार इत्यर्थः सर्वाधारत्वात्प्रतिष्ठा
पदसमभिव्याहारादाधारलक्षणा युक्तेति इतश्च पुच्छशब्देनाधारो लक्ष्यते इत्याह तद्धेतुव्यपदेशाच्च
तस्य ब्रह्मणो विकारजातं प्रति हेतुत्वेन इदं सर्वमसृजतेति वाक्यव्यपदेशादित्यर्थः नहि स्वविकारमानं
दमयं प्रति ब्रह्मणोऽवयवत्वं संभवति मुख्यत इति स्वप्रधानं ब्रह्म पुच्छं ज्ञेयत्वेन विवक्ष्यत इति मांत्रव
र्णिकमेव च गीयते सत्यं ज्ञानमित्यादिमंत्रवर्णप्रकाशितं ब्रह्म तद्ब्रह्म पुच्छं प्रतिष्ठेति ब्राह्मणवाक्ये स्व
प्राधान्येन गीयते मंत्रब्राह्मणयोरैकार्थ्यादित्यर्थः इतश्चानंदमयो न प्रतिपाद्यः तस्यैवं पिविपि
पाद्यवयवयोगेन सच्छत्वानुपपत्तेरित्याह नेतरोऽनुपपत्तेः ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्म स्वप्रधानं नेतरः
कुतः अनुपपत्तेः ब्रह्मणोऽवयवत्वेऽवयव्यानंदमयोऽत्र प्रतिपाद्य इति वक्तव्यं नहि तत्संभवति सावयव
स्यानित्यवाक्योक्तसच्छत्वाद्यनुपपत्तेरित्यर्थः अतो ब्रह्म स्वप्रधानं इतश्चात्र पुच्छवाक्ये ब्रह्म स्वप्र
धानमित्याह भेदव्यपदेशाच्च रसं ह्येवायं लब्ध्वानंदी भवति अयमानंदमयो जीवो रसशब्दितं
ब्रह्मानंदं प्रतिबिंबितं लब्ध्वानंदी भवतीति लब्धृलब्धव्यरूपेण भेदव्यपदेशादित्यर्थः इतश्च ब्र
ह्मपुच्छवाक्ये आनंदमयो न प्रतिपाद्य इत्याह कामाच्च नानुमानापेक्षा कामयते इति कामः आ

त्व

७

घ

त्मकेन तादात्म्यभ्रान्त्येदृश्यमिन्निस्वसंबंधितया ध्यस्तेंद्रियजातेनापंचीकृतभूतकार्येणात्मेन तादात्म्याद्दीनेः ना

ति त्मानिवृत्तोत्पद्यत इति निरस्तां भूतस्थूलस्यातितेभ्यभेदवर्जितेभ्निरूक्तेनिःशेषलयस्थानं निजयनं सकलका

र्यसंस्काराधाराविद्यातदभेदभ्रान्त्या प्रकर्षेणाक्षिप्तं पुनरावृत्तिरहितां लभते अभयं प्रयस्यादित्य

न्नेव्यनक्ति अथेति ज्ञानफलमुक्त्वा ज्ञानाभावे दोषमाह श्रुतिः यदा हीति यद्यस्मिन्नानंदमये ब्रह्मणि अल्प

मप्यंतरमतादात्म्यस्वरूपं पश्यति तदा संसारभयान्न निवर्तते इत्यर्थः इदं शास्त्रं प्रधानपरि ग्रहे जीवपरिग्र

हे वानवद्यत इति तस्मादानंदमयः परमात्मेति सिद्धं इदं त्वेकदेशिमतं [illegible] अभ्यस्यमानानं

दपदस्यानंदमये लक्षणा अन्योंतर आत्मानंदमय इत्यत्रानंदपदस्य प्राचुर्यार्थकत्वे ब्रह्मणि दुःखलवप्रसं मय

गः स्यादिति प्रचुरानंदे लक्षणा ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्मपदस्यावयवविशेषलक्षणेति मुख्यत्रितयपद प

नं विकारप्रायपाठपरित्यागश्चैकदेशिमते स्यात् स्वपक्षे तु ब्रह्मपुच्छमित्यत्र पुच्छपदस्यावयवप्रायपाठपरि

त्यागमात्रमिति मन्वाना आनंदमय इति मयड् विकारार्थक एवेति वदंतः सूत्राण्यन्यथा व्याचक्षुः अधिकर

त्वे णं च नानुब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानंदमयावयवत्वेन ब्रह्मोच्यते उत स्वप्रधानत्वेनेति ब्रह्मपुच्छशब्दाभ्यां

संशयः इदं तत्त्वाधिकरणे संशयाभावात् प्रायपाठस्य न नियामकत्वमिति पुच्छपदस्यावयवाधारत्वयोर्लक्ष

णासामान्यात् संशये अवयवप्रायपाठस्य नियामकत्वमिति प्रत्युदाहरणासंगतिः प्रयोजनं च पूर्वमुक्तं च

तत्र पुच्छशब्दादवयवत्वे प्राप्ते उच्यते आनंदमयोभ्यासात् आनंदमयशब्देनानंदमयवाक्यस्थ ब्रह्मपुच्छं

ब्रह्म प्रतिष्ठेत्यत्र विधमानं ब्रह्मपदमुपलक्ष्यते तद्रूपदं प्रधानं ब्रह्मपरं कुतः अभ्यासात् असन्नेव स भवति असद्

ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदेत्यादौ ब्रह्मपदस्याभ्यासादिति यत्तु पुच्छशब्दादवयवपरत्वमिति तत्राह

संतमेनं ततो विदुः

१७ १४

नेत्रे ध्यानार्थमेव नाम करोति तस्येति नाम निर्वक्ति स इति उदित उन्नतः स कार्यसर्वपापास्पृष्टस्य
र्थः ध्यानफलमाह उदेतीति अधिदैवतं देवतामधिकृत्योपास्तिवाक्यमित्यर्थः अधिदैवध्यानो
क्तमनंतरं आत्मानं देहमधिकृत्याधितिष्ठतीत्याह अथेति एतावदुक्तं ध्यानहेतुर्यस्यं पुरुषस्याधिकृ
त्यरूपवत्वश्रुत्या सर्वपापास्पर्शश्रुत्या च संशयः किमयं पुरुषो विद्याकर्मातिशयवशात्प्राप्तो
त्कर्षः कश्चित्संसारी उत नित्यसिद्धः परमेश्वर इति किं तावत्प्राप्तं संसारीति कुतः हिरण्यश्मश्रु
त्यादिरूपवत्वश्रवणात् आदित्यपुरुषस्यापि तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति रूपवत्वश्रव
णात् ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यादित्यपुरुषस्य स एष ये चैतस्माद
र्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्यक्षिपुरुषस्य चैश्वर्यमर्यादाश्रवणाच्च न हि परमात्म
नो मर्यादावदैश्वर्यं युक्तं स एष सर्वेश्वर इति श्रुतेः अमुष्मादादित्यादूर्ध्वगानां लोकानामधिष्ठिता
देवभोगानां चेत्यर्थः एतस्माच्चक्षुषोऽर्वाग्गतानां लोकानामधिष्ठिताक्षिपुरुषः मनुष्यभोगानां
चेत्यर्थः तस्मान्नाक्ष्यादित्ययोरंतःपुरुषः परमेश्वर इति प्राप्ते उच्यते अंतस्तद्धर्मोपदेशात् य एषोंत
रादित्ये य एषोंतरक्षिणीति च श्रूयमाणः परमेश्वर एव न संसारी कुतः तद्धर्मोपदेशात् तस्य परमे
श्वरस्यैव धर्मास्तेषामभिहितत्वात् उपदेशादित्यर्थः तथा तस्योदिति नामेत्यादिना सर्वपाप्मविर
हेणोदितत्वं पुरुषस्य नाम श्राव्य तदेव नामाक्षिपुरुषस्यातिदिशति यन्नाम तन्नामेति तत्सर्वपाप्मराहित्यं
ब्रह्मधर्मः एवं सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मेति ऋगाद्यात्मत्वनिर्धारणमपि श्रुतिः तच्च सर्वात्म
कब्रह्मण एवोपपद्यते सैव ऋगित्यादेरयमर्थः तच्छब्देन पुरुषपरामर्षः विधेयापेक्षया स्त्रीलिंगम्

तानं

दर्शनात्

नंदस्तस्य ब्रह्मत्वं दृष्टं नानुमाने नानंदमयस्यापि ब्रह्मत्वमपेक्षितमयं विकारार्थकमयड् विरोधा
दित्यर्थः। अनुमानप्रकारस्तु आनंदमयशब्दो ब्रह्मपरः आनंदशब्दत्वात् आनंदो ब्रह्मेत्यत्रा
नंदशब्दवदिति। इतोपि ब्रह्मपुच्छवाक्ये ब्रह्मस्वप्रधानमित्याह। अस्मिन्नस्य च तद्योगं शास्ति।

प

अस्मिन्पुच्छवाक्ये नैव ब्रह्मणि प्रबुद्धस्यानंदमयस्य जीवस्य यदा ह्येवैष एतस्मिन्नित्यादि शास्त्रं तद्यो
गं मुक्तिं शास्तीत्यर्थः। तस्मादानंदमयस्यात्राप्रतिपाद्यत्वात्पुच्छे ब्रह्मैव स्वप्रधानं निर्विशेषं चेत्तेयमिति
सिद्धं।१९। अंतस्तद्धर्मोपदेशात्॥२०॥ पूर्वत्र ब्रह्मपदमानंदमयपदमानंदपदाभ्यासश्रुतिमुख्यत्व
तया तन्मात्रवर्जुप्रमाणवशान्निर्गुणब्रह्मनिर्णयोपपादनात् इह तु रूपवत्त्वादिवर्जुप्रमाणात् संसारी हिरण्म

र

यः पुरुषोऽस्त्विति पूर्वसिद्धांतयुक्त्या पूर्वपक्षोत्थानात् दृष्टांतरूपावांतरसंगत्या पूर्वसिद्धनिर्गुण
ब्रह्मसमन्वयापवादकमिदमारभ्यते फलं च पूर्वोत्तरपक्षयोरुपास्तिरेव पादसमाप्तिपर्यंतं छांदो
ग्ये श्रूयते अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्
सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदि
त उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्याधिदैवतमथाध्यात्ममथ य एषोंतरक्षिणि पुरुषो दृश्य
त इत्यादि उपास्तिप्रस्तावार्थोथशब्दः एष शास्त्रप्रसिद्ध आदित्यमंडलमध्यवर्ती ध्यातायव
यवकयनं परमात्मन उपास्यपर्यं दृष्टव्यं हिरण्मयः ज्योतिर्मयः तत्र ब्रह्महितधीयामनुभवं प्रमाण
यति दृश्यत इति हिरण्यपदं ज्योतिःपरं सुवर्णपदमपि प्राणत्वेन स्वामिनं चक्षुषो विशेषमाह तस्ये
ति कपेर्मर्कटस्य आसः पृष्ठभागो यत्तत्तेजस्वि तद्वत्पुंडरीकं तद्यावत्तत्तेजस्वि तस्य देवस्याक्षिणी

गत्यतिष्ठा तत्राह सर्वाणीति भूताकाशव्यावृत्तये हेतुं स्माह आकाशो ह इति तत्रैव हेत्वंतरमाकाश
इति अयं सिद्धांतार्थः तत्र रूढ्या भूताकाश इति युक्तं न च वाक्यशेषानुपपत्तिः आकाशाद्वायुरित्या
दौ तस्यापि वाय्वादिकारणत्वश्रवणात् तस्माद्भूताकाश इति प्राप्ते ब्रूमः आकाशस्तल्लिंगात् ॥ २२ ॥ आ
काशशब्देन ब्रह्मणो ग्रहणं युक्तं कुतः तल्लिंगात् तस्यैव ब्रह्मणो यल्लिंगमसाम तस्य स्रष्टृत्वादिकं तस्यास्मिन्वा
क्ये दृष्टत्वादित्यर्थः ननु इदं भूताकाशस्यापि वाय्वादिकारणत्वं दर्शितमिति चेन्न मूलकारणब्रह्मणोऽप
रिग्रहे आकाशादेवेत्यवधारणं सर्वाणीति च भूतविशेषणं आकाशं प्रत्यस्तं यंतीति कारणे लयप्रद
र्शनं चानवक्लृप्तं स्यात् ज्यायस्त्वपरायणत्वप्रदर्शनं च ब्रह्मण्येव समंजसं श्रुत्यंतरं च स्पष्टं ब्रह्मण एव
परायणत्वं दर्शयति विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणमिति रातेर्धनस्य दातुर्यजमानस्य राति
रिति पाठे रातिर्बंधुरित्यर्थः किंच स एष परोवरीयानुद्गीथः स एषोऽनंतः इत्युद्गीथे आकाशरूपदेवताध्या सान्नो भागवि प्रोक्तः
नीत्यरत्वादीनुपसंहरति जैवलिः तद्भूताकाशेन युज्यते न हि तस्यानंत्यं संभवति श्रुतौ परत्वं गुणतः उत्क
ष्टत्वं वरीयस्त्वं कालतो वस्तुतश्चापरिच्छिन्नत्वं अनंतत्वं देशतोऽपरिच्छिन्नत्वं इष्टत्वं च यत्तल्लिंगात् श्रुतिर्व
लीयसाऽतितन्नत्यजेदेकं कुलस्यार्थे इति न्यायेन बहूनामनवकाशलिंगश्रुतीनामनुग्रहाय एकस्या
आकाशश्रुतेर्बाधस्यैव युक्तत्वात् तस्मादाकाशशब्देन ब्रह्मैवात्र देवतोद्गीथेऽउपास्यमिति सिद्धं ॥ २२ ॥ अत
एव प्राणः ॥ २३ ॥ अत्र चातिदेशत्वान्न पृथक् संगत्यपेक्षा यद्वा पूर्वत्राकाशश्रुतेरव्यभिचारिब्रह्मलिंगो
पबृंहितत्वाद्बाधो युक्तः इह तु श्रूयमाणसंवेशनादिलिंगस्य प्राणेऽपि संभवेनाऽव्यभिचारिब्रह्मलिंग
सहचाराभावात् प्राणश्रुतिर्बाधो न युक्त [illegible] इति प्रत्युदाहरणसंगतिः तत्रैवाकाशवाक्यानंतरं

अप्रगानं प्रगानं अप्रगानं

पदेशः उक्थं शास्त्रविशेषः तत्साहचर्यात्साम स्तोत्रं उक्थादन्य ऋक्संज्ञकं वस्तत्र यो वेदा इति एवं स
वेगानगीयमानत्वं श्रुतौ निर्दिष्टं तच्च इमे वीणायां गायन्त्येतं मेव ते गायन्तीत्यादौ ईश्वरस्य श्रु
शादिकं नापि कं परमेश्वरस्य लोकानुगतार्थमुपपद्यते इति न तेन विरोधः अतस्तस्मादक्ष्यादित्ययोर
न्तः परमात्मा ।२०। किं च भेदव्यपदेशाच्चान्यः ।२१। आदित्याक्ष्योरन्तः श्रूयमाणः पुरुष आदित्यश
रीराभिमानिनो जीवादन्यः कुतः भेदव्यपदेशात् आदित्यशरीराभिमानि जीवादन्यस्य परमात्म

यएभ्योंतरादिते अनया

नोऽन्तर्यामित्वं तर्यामि ब्राह्मणे भेदेन व्यपदेशादित्यर्थः य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो
न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यादि श्रुत्यन्तरे तयोर्भेदव्य

त्य

पदेशादत्रापि आन्तरशब्दश्रुत्या प्रत्यभिज्ञानात् परमेश्वर एवास्यादित्ययोरुपास्य इति सिद्धं ।२१। आका
शस्तल्लिंगात् ।२२। पूर्वमव्यभिचारि ब्रह्मलिंगेनापहतपाप्मत्वादिना रूपवत्त्वादिकमन्यथा नीतं
इह तु लिंगादाकाशशब्दश्रुतिरन्यथा नेतुं न शक्यते लिंगापेक्षया श्रुतेः प्रबलत्वादिति प्रत्युदाह
रणसंगत्येदमारभ्यते छान्दोग्ये श्रूयते अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि
ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः
परायणमिति तत्रोभयत्राकाशशब्दस्य प्रयोगदर्शनात्संशयः किं भूताकाशोऽत्राकाशशब्देनाभिधीय
ते उत परं ब्रह्मेति पदे च आकाशमात्मानं दोतुस्यादित्यादि वेदे ब्रह्मण्याकाशशब्दप्रयोगः भूताकाशे

नाम

रूढ इति विषयवाक्यार्थस्तु शालावत्यः कः कस्मिन्नत्र पि जैवलिं राजानं पृच्छति अस्येति सर्वस्य
प्रपंचस्य किमधिकरणमिति प्रश्नार्थः जैवलिस्तु उत्तरमाह आकाश इति कथंभूत आकाशः सर्वज्ञ

अप्रतिष्ठातं

ष्पादिति गायत्रीशब्देनाभिधीयते चतुष्पात्त्वगुणयोगात् तथा गायत्री सा दृष्टेन चेतोर्पणस्य ध्यान
स्य निगदाद्विधानादिति तथा हि दर्शनमिति छन्दोभिधायि शब्दस्य सादृश्यादन्यत्र प्रयोगो दृष्टांतः तथा
हि ते वा एते पंचान्ये पंचान्ये दश संतस्तत्कृतमित्युपक्रम्याह सैषा विराडिति अस्यार्थः संवर्गविद्यायाम
धिदैवमग्निसूर्यचंद्रमांसि वायौ लीयंते अध्यात्मं प्राणे वाक्चक्षुःश्रोत्रमनांसीत्युक्तं ते वायुना सह पंचा
धिदैविका आध्यात्मिकेभ्यः प्राणादिभ्योऽन्ये तथा प्राणादयः पंच आधिदैविकेभ्योऽन्ये एवं ते सर्वे दश संतः कृ
तमित्युच्यते कृतापरपर्यायचतुरायनामकद्यूतगतचतुरंकवत् चत्वारः पदार्थाः प्रकृते संति त्र्यंकाय
वत्त्रयः द्व्यंकायवत् द्वौ एकांकायवदेक अस्त्येव कृते दशके सर्वांतर्भावात्तज्जयेन सर्वजयो भवति यथा
कृते जिते त्रेतादिसंज्ञानि त्र्यंकायादीनि जितानि भवंतीति तद्वत् तत्र चतुरायकापरपर्याय चतुरंकायनाम २
कद्यूतस्य कृतमिति संज्ञा स च चतुरंकायो दशात्मकः चतुर्थके युगपत्त्रिषु द्वयोस्तयोरेकस्य चांतर्भावात्
वाय्वादयोपि दशतया च दशत्वसंख्यासादृश्याद्वाय्वादयः कृतमित्युच्यंते एवमेव दशाक्षरा विराडिति
श्रुत्या विराड्नामकछंदसो दशात्मत्वाद्वाय्वादौ विराट्शब्दप्रयोग इति यथा तद्वत् ब्रह्मणश्चतुष्पा
त्त्वसामान्यात् गायत्रीशब्दप्रयोग इति दृष्टांतार्थः तस्मात्पूर्ववाक्ये ब्रह्मैव निर्दिष्टं न छंद इति सिद्धं॥
२५॥ भूतादिपादव्यपदेशोपपत्तेश्चैवं॥२६॥ इतश्च गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमित्यभ्युपगंतव्य
मित्येवंशब्दार्थः कुतः भूतादिपादव्यपदेशोपपत्तेः भूतपृथिवीशरीरहृदयैश्चतुष्पदा गायत्रीति व्य
पदेशस्य ब्रह्मण्येवोपपत्तेरित्यर्थः नह्यक्षरसन्निवेशरूपगायत्र्यां भूतादिपादव्यपदेशः संभवति किं
च ते वा एते पंच ब्रह्मपुरुषा इति श्रुतिः पूर्वं ब्रह्मणः प्रकृतत्वे संगच्छते तथा हि गायत्र्याख्यब्रह्मणो हार्दसो

एवं च परतः पर इत्यत्र यच्छब्दस्य सर्वनामत्वेन प्रसिद्धार्थवाचकत्वात्पूर्ववाक्ये द्युसंबंधित्वेन प्रसिद्धं
ब्रह्मात्रापि द्युसंबंधाद्यच्छब्देन प्रत्यभिज्ञाप्यते न प्राकृतं ज्योतिरिति केतेनः अतः पर इत्यादिना श्रुतं ब्रह्म
णो मर्यादादिकमुपासनार्थमित्युक्तं ज्योतिःशब्दो ब्रह्मण्यपि प्रसिद्धो वेदांतेषु तस्मादिह ज्योतिःशब्देन ब्रह्म
२४। छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनं।२५। पदं तु पूर्वत्र गायत्र्याख्यछंद
उपाधिकब्रह्मण उक्तत्वात्तदत्र प्रत्यभिज्ञाप्यत इति तन्न गायत्री वा इदं सर्वं भूतं यदिदं किंचेति गायत्र्याख्य
छंदसः प्रकृतत्वात्तस्यैव पादोस्य सर्वा भूतानीति भूतपादव्यपदेशो न ब्रह्मण इति पूर्ववाक्ये छंद एवा
भिधीयते न ब्रह्मेति चेन्न गायत्र्याख्यछंदोद्वारेण तदनुगतब्रह्मणि सर्वात्मकत्वं प्रतिपाद्यते गायत्री वा
इदं सर्वमित्यादिना न ह्यक्षरसन्निवेशमात्राया गायत्र्याः सर्वात्मकत्वं संभवति तस्माद्गायत्र्यां विका
रे यदनुगतं ब्रह्म तदेव गायत्री वा इदं सर्वमित्यादिना प्रतिपाद्यत इति निष्कृष्टार्थस्तु छंदोभिधानाद्गा
यत्र्याख्यछंदस एव पूर्ववाक्ये प्रकृतत्वात् न ब्रह्मणः प्रकृतत्वमिति चेन्नतुतः तथा छंदोद्वारेण तद्गते
ब्रह्मणि चेतोर्पणस्य चित्तसमाधानस्य निगदादभिधानात् तत्र हेतुः तथाहि दर्शनं अन्यत्रापि वि
कारद्वारेण ब्रह्मण उपासनं दृश्यत इति दर्शनं दृष्टमित्यर्थः एतं ह्येव बह्वृचा महत्युक्थे मीमांसंते एत
मग्नावध्वर्यव एतं महाव्रते छंदोगा इति तदर्थस्तु एतमेवात्मानं ऋग्वेदिनो महत्युक्थे प्रधानशस्त्रे
तदनुगतमुपासते यजुर्वेदिनो ऽग्नौ क्रतौ सामवेदिनो महाव्रताख्ये क्रतौ तदनुगतं ब्रह्मानुसंदधत इ
त्यैतरेये दृष्टमित्यर्थः एवं च गायत्रीशब्दो ब्रह्मलक्षक इति पूर्ववाक्ये ब्रह्मनिर्दिष्टं यद्गायत्रीशब्देन ब्र
ह्मणि गौणः तथा च सूत्रे सिद्धांतभागस्यायमर्थः यथा गायत्री षडक्षरैः पादैश्चतुष्पदा एवं ब्रह्मापि चतु

मात्मन्यस्मिन्निति। हि यस्मादस्मिन्नध्याये अध्यात्मसंबंधस्य परमात्मसंबंधस्य भूमा बाहुल्यं उपल
भ्यत इत्यर्थः तद्यथा यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुरिति प्राणस्यैव प्रज्ञात्मनः परमात्म
भूतस्या ऽऽयुःप्रदानोपसंहारयोः स्वातंत्र्यं दर्शयति न परालीनस्यैव हि स्य एवमस्तित्वे च प्राणानां निःश्रे
यसमिति श्रुतिरात्मानमिंद्रियाश्रयं प्राणं दर्शयति प्राणस्यास्तित्वे स्थितो प्राणानामिंद्रियाणां निःश्रे
यसं स्थितिरिति श्रुत्यर्थः एवमेव न वाचं विजिज्ञासीत वक्तारं विद्यादिति परमात्मानं वक्तारमुपक्रम्य
तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः
प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति वाक्यं विषयेंद्रियव्यवहारानभिभूतं प्रत्यगा
त्मानमेवोपसंहरति श्रुत्यर्थस्तु तत्र तत्र भूतमात्रादीनां नानात्वेनेत्यर्थे दृष्टांतः यथा लोके प्रसिद्ध
स्य रथस्यारेषु मध्यवर्तिशलाकासु चक्रोपांते नेमिरर्पिता नाभौ चक्रपिंडिकायामराश्चार्पिता
स्तद्वद्भूतानि पृथिव्यादीनि मात्राः शब्दादयो विषया मीयंत इति मात्राः प्रज्ञामात्रासु स्वस्वबोधकेंद्रि
द्रियेषु बुद्धिद्वारा अर्पिताः कर्मेंद्रियेष्वपि तद्धि यथा अर्पितास्तदधीनत्वात्तद्व्यवहारस्य ताश्च प्रज्ञामा
त्राः प्राणे परस्मिन्नर्पिताः प्राधान्यं ब्रह्मत्वे लिंगं स एष इति तस्मादध्यात्मसंबंधभूमा कृत्स्नात्मा प्राणात्म
कब्रह्मोपदेश एवायं न देवतात्मोपदेश इति सिद्धं। २९। कथं तर्हि वक्तुरात्मोपदेश इत्याशंक्याह।
शास्त्रदृष्ट्या तूपदेशो वामदेववत्। ३०। इंद्रस्य वक्तुर्मामेव विजानीहीत्युपदेशः शास्त्रदृष्ट्या ज्ञातव्यः
अहमेव परं ब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः तत्र दृष्टांतः वामदेववदिति यथा वा
मदेवः शास्त्रदृष्ट्या अहं मनुरभवं सूर्यश्चेत्याह तद्वदित्यर्थः यदुक्तं लिंगोपपत्तीनित्यादि देवतापरत्वे लिं

कामस्य प्राणोऽपास्यत्वेनोपदिश्यते प्राणोऽस्मीत्यादिना एवं च परमपुरुषार्थत्वेनोपदिश्यमानः प्राण
ः कथं प्राणवायुः स्यात् तथास्य यो ह मां वेद न ह वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रू
णहत्ययेत्यादि ब्रह्मपरिग्रहे घटते क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिना ब्रह्मज्ञा
तिनः कर्मक्षयश्रवणात् तदर्थस्तु कोऽधिकारी मां ब्रह्मस्वरूपं साक्षादनुभवति तस्य विदुषो लो
को मोक्षो न मीयते हिंस्यते महतापि पापेन ज्ञानमहात्म्येन सर्वस्यापि पापस्य दग्धत्वादिति भा
वः एवं प्रज्ञात्मत्वं च ब्रह्मण एव युक्तं एवमुपसंहारे आनन्दोऽजर इत्यपि ब्रह्मपरत्वे घटते तत
था स न साधुना कर्मणा भूयान्भवति नो एवासाधुना कनीयान् एष ह्येव साधुकर्म कारयति ए
ष उ एवासाधुकर्म कारयति एष लोकाधिपतिरेष लोकपाल एष लोकेश इति च ब्रह्मण एव
समञ्जसं अत्र हि धर्माद्यसंस्पृष्टत्वं तत्कारयितृत्वं तदीशितृत्वं च ब्रह्मणोऽसाधारणलिंगम
स्तीति तस्मात्पूर्वापरपर्यालोचनया ब्रह्मपरमेव प्राणपदमिति ।२८। न वक्तुरात्मोपदेशादि
ति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् २९ ननु यदुक्तं प्राणो ब्रह्मेति तदयुक्तमिति नञर्थः कुतः
वक्तुरात्मोपदेशात् वक्तुरिन्द्रस्यात्मोपदेशादित्यर्थः तथा हि किल काशीशो नाम कश्चिद्विग्रहवान्देव
ताविशेषः स्वमात्मानं प्रतर्दनायोपदिशति मामेव विजानीहि इत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्यहं
कारवादेन किंच देवतायाः प्राणत्वे लिंगान्तरमस्ति अरुन्मुखान्यतीन्शालावृकेभ्यः प्रायच्छ
मिति रुक्तवेदान्तवाक्यं तद्ध्येषां मुखेन वर्तन्ते ते अरुन्मुखाः शालावृकेभ्य आरण्यश्वभ्यः नहीदं
ब्रह्मणो युक्तं । एवमिन्द्रपरत्वे स्थिते तद्व्याख्यानं भवं योजनीयमिति प्राप्ते उच्यते अध्यात्मसंबन्धभूम्

भूतायाः प्रपत्नावेषु क्त इति ह्यांतसंगतिः पदार्थप्रतीतेः स्वातंत्र्यं जनकत्वेन वाक्यार्थप्रतीतेर्गुण

१९ स्याधिकरणस्य पद्धापूर्वोदितविदिव इत्यत्र प्रधानप्रकृत्यर्थानुरोधाद् गुणभूतप्रत्ययार्थोऽन्यथा नी
तोपयात दृदिहापि स्वतंत्रप्राणादिपदार्थभेदप्रतीतौ तत्सापेक्षब्रह्मरूपवाक्यार्थप्रतीतेर्गुणत्वं तन्नी
त तत्वेनेति बोध्यं अस्ति कौषीतकि ब्राह्मणोपनिषदि इंद्रप्रतर्दनाख्यायिका प्रतर्दनो ह वै दैवोदासिरिं
द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च त्यारभ्याम्नाता तस्यां श्रूयते स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मा
मायुरमृतमुपास्स्वेति तथोत्तरत्रापि अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति तथा न
वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि अंते च स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इत्यादि अस्यार्थः
दिवोदासस्यापत्यं पुमान् दैवोदासिः प्रियं प्रेमास्पदं धाम गृहं तज्जतो हेतुः युद्धेनेति तत्कारणेन पुरुषका
रप्रदर्शनेन च प्रतर्दनो राजा इंद्रस्य गृहं जगामेत्यन्वयः तं हस्मा इंद्र उवाच प्रतर्दन वरं ते ददामि स होवाच
प्रतर्दनः हे इंद्र त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति ततः इंद्र उवाच प्राणोऽस्मीत्यादि मुख्य
प्राणं व्यावर्तयति प्रज्ञात्मेति। निर्विशेषचिन्मात्रं व्यावर्तयति तं मामिति। इदं च प्राणस्य इंद्ररूपदेवता
त्वे लिंगं प्राणस्य मुख्यप्राणरूपत्वे लिंगं अथ खल्वित्यादि वागादीनां देहधारणशक्त्यभावनिश्चयानं
तर्यमयशब्दार्थः प्राणवायोर्देहधारणं तदुत्थापनं च कार्यमिति प्रसिद्धमिति खल्वित्युक्तं प्राणस्य जी
वत्वे लिंगं न वाचमिति। प्राणस्य परमात्मत्वे लिंगं स एष इत्यादि एवं च प्राणशब्दस्य इंद्रप्राणवायुजी
वपरमात्मपरत्वे लिंगानां विद्यमानत्वात्संशयः किंपरः प्राणशब्द इति तत्र प्रसिद्धत्वात्प्राणवायुपर
इति प्राप्ते उच्यते प्राणस्तथानुगमात् २८ तत्र प्राणो ब्रह्मैव कुतः तथानुगमात् तथा ब्रह्मपरत्वेनान्व
नुगमात् अन्वयात् आमादित्यर्थः तथा हि प्रतर्दनः खलु हिततमं पुरुषार्थं पृष्टवान् तस्य परमपुरुषार्थ १९

14

पास्यत्वेन द्वारपालादिगुणविध्यर्थं तस्य ह वा एतस्य हृदयस्य पंच देवसुषयः इत्यादिवाक्यं तत्र ते वा एते पं
च ब्रह्मपुरुषा इति श्रुते तथा चोपास्यंगानां द्वारपालानां हृदयच्छिद्रेषु स्थितानां प्राणादिवायूनां ब्रह्म
पुरुषत्वोक्तेः हृदयच्छिद्रेष्वपि ब्रह्मसंबंधो वगम्यते इत्यतोऽस्मिन्पूर्ववाक्ये ब्रह्म प्रकृतं न हि गायत्रीमात्र
स्यैवोपास्यत्वे तदंगानां ब्रह्मपुरुषत्वं युक्तं अतो हृदयच्छिद्रेषु ब्रह्मसंबंधात् तत्रस्थवायूनां ब्रह्मपुरुषत्वमि
ति ब्रह्मपुरुषश्रुत्युपपत्तेरिति अयमर्थः हृदयस्य पंच देवच्छिद्राणि प्राच्यादीनि नामदेवैः प्राणादिवायुभि
र्देवैः परिपाल्यत्वात् देवसुषित्वं छिद्राणामुपचर्यते तानि हृदयच्छिद्राणि हृदयस्य प्राङ्मुखदक्षिणमुख
प्रत्यङ्मुखोदङ्मुखोर्ध्वमुखरूपाणि तत्स्थाः प्राणव्यानापानसमानोदाना मुख्या वायवः क्रमेणादित्यचं
द्राग्निपर्जन्याकाशनामकाः पंच ब्रह्मपुरुषा इति तस्माद्गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति ज्योति
र्वाक्येऽप्यसंबंधात् तदेव प्रत्यभिज्ञायते इति सिद्धं ।२६। उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ।
२७। ननु पूर्वस्मिन्वाक्ये त्रिपादस्यामृतं दिवीति सप्तम्या द्यौराधारत्वेन निर्दिश्यते अथ यदतः परो दि
वो ज्योतिरित्यत्र पंचम्या अवधित्वेन द्यौर्निर्दिश्यते तथा च विभक्तिभेदेनोपदेशभेदात् ज्योतिर्वाक्ये प्रत्यभि
ज्ञानं संभवतीति चेन्नैवं यतः उभयस्मिन्नप्यविरोधात् विभक्तिभेदेनोपदेशभेदेऽपि प्रत्यभिज्ञाया अविरोधा
दित्यर्थः प्रधानप्रातिपदिकार्थेन प्रत्यभिज्ञायां गुणभूतविभक्त्यर्थेन प्रतिबंधक इति भावः तस्मात्परं
ब्रह्मैव कौक्षेयकाग्नेरुपास्यं ज्योतिःशब्देनान्यज्योतिकं तेज इति सिद्धं ।२७। प्राणस्तथानुगमात् ।२८।
पूर्वस्मिन्नधिकरणे यदतः पर इत्यत्र पंचम्यवधित्वप्रसिद्धार्थवाचकस्य बलवत्त्वात् तत्सहकृतं ब्रह्मलि
गं तेजोलिंगमपि यथा बलवदित्युक्तं न तथेह किंचित्तत्र बलवत्संपादकमस्तीति प्रत्युदाहरणसंगतिर

तं भवत्येकवाक्यत्वे वाक्यभेदो नेष्यते
हि

जीवमुख्यप्राणब्रह्मणां त्रयाणामुपास्यानां प्रत्येकं स्वातंत्र्येणैव वाक्यार्थत्वमिति त्रीणि वाक्यानि नैकं
ब्रह्मवाक्यमिति चेन्न उपासात्रैविध्यात् त्रीण्युपासनानि प्रसज्येरन्नित्यर्थः उपक्रमोपसंहाराभ्यां ब्र
ह्मपरत्वे नैकवाक्यत्वे संभवति वाक्यभेदो न युक्तो न च पदार्थप्रतीतेर्मुख्यत्वं तस्या वाक्यार्थप्रतीति
शेषत्वेन तस्या एव प्रधानत्वात् नहि जनकत्वमात्रेण प्राधान्यं युक्तं सन्निपत्योपकारकाणामपि प्रधान
त्वापत्तेः अन्यत्र ब्रह्मलिंगवशात्प्राणशब्दस्य ब्रह्मणि वृत्तेराश्रितत्वाच्च इहापि हि तत्तदुपन्यासादिब्रह्म
लिंगयोगाद्ब्रह्मण्येवायमुपदेश इति यत्तु जीवादिलिंगमस्तीति तत्परत्वमिति तन्न प्राणव्यापारस्यापि
परमेश्वरायत्तत्वेन देहधारणस्यापि ब्रह्मण्युपचरितुं शक्यत्वेनानन्यथासिद्धप्राणपुंलिंगाभावात् ॥ वा
तथा च श्रुतिः न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति
प्राणादिव्यापारस्येश्वरायत्तत्वमाह नापि न वाचं विजिज्ञासीतेत्यादिजीवलिंगविरोधः जीवस्य
ब्रह्मानन्यत्वेन सर्वोपाधिपरित्यागेन जीवस्य स्वरूपं ब्रह्म दर्शयितुं न वाचं विजिज्ञासीतेत्यादि प्रत्यगा
त्माभिमुखीकरणार्थमुपदेशो न विरुध्यते यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि इति
श्रुत्यंतरं वागादिव्यापृतस्य वस्तुनो ब्रह्मत्वं दर्शयति तस्माद्ब्रह्मपरमेवेदं वाक्यं न प्राणादित्रितयपरं एकदे
शिनस्तु नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्यार्थांतरमाचक्षते तथाहि न ब्रह्मवाक्ये जी
वमुख्यप्राणलिंगयोर्विरोधः कुतः उपासात्रैविध्यात् जीवधर्मेण प्राणधर्मेण ब्रह्मधर्मेण च ब्रह्मणस्त्रि
विधोपासनस्यैकस्य विवक्षितत्वादित्यर्थः अतो न वाक्यभेद इति तत्रायुरमृतमित्युपास्वायुः प्राण इति इदं श
रीरं परिगृह्योत्थापयति तस्मादेतमेवोक्थमुपासीतेति प्राणधर्मः अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवंति

गमितितन्नपदेदंतवाक्योत्थज्ञानप्रभावादहमेवंभूतोस्मीतीहशब्देदंतवाक्यान्तरः स्थेयानिनो
चेदरत्यपश्चम्यः प्राणष्ठोस्मीत्येतदर्थकत्वेनाविरोधात्तस्मात्प्राणोत्र ब्रह्मपरमेतद्वाक्यमितिसिद्धं॥ ॥ जी
वमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात्॥३१॥ ननु यदुक्तमध्यात्मसंबंधबा
हुल्यान्नदेवतात्माप्राण इतितत्सत्यं तथापि न ब्रह्मपरमेवेदं वाक्यं किंतु जीवमुख्यप्राणवाप्युपरमपि कु
तः जीवलिंगान्मुख्यप्राणलिंगाच्च न वाचं विजिज्ञासीत वक्तारं विद्यादिति जीवलिंगं वागादिकरणैर्व्यव
तस्य वक्तुर्जीवस्य विशेषत्वमुपलभ्यते एवं प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति प्राणलिंगं
देहधारकस्य प्राणलिंगत्वात् तथाहि प्राणसंवादे श्रूयते वागादयः सर्वे प्राणाः प्रत्येकं श्रेष्ठतामात्मनोभि
मन्यमानास्तन्निर्धारयितुं प्रजापतिमुपजग्मुः स च तानुवाच यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमि
व भवति स युष्माकं मध्ये श्रेष्ठ इति तस्मिन्प्रजापतावेवमुक्तवति वागादिषूत्क्रान्तेष्वपि मूकादिभा
वेन शरीरं स्वस्थमस्थात् मुख्ये प्राणे त्वौक्रमितुमारब्धे वागादीनां व्याकुलत्वात्तान्प्रतिप्राण उवा
च मा मोहमापद्यथ यतोहमेवैतत्करोमि किं तत् पंचधा प्राणापानादिभेदेनात्मानं विभज्य एतद्बाणं
शरीरं वातिगच्छतीति बाणमेवमात्मस्थिरं शरीरमिति यावत् तदवष्टभ्य विधारयामीति श्रवणाद्देह
धारकत्वप्राणलिंगमेवावगम्यते तोनुक्रान्ताश्रुतिस्तु। मा मोहमापद्यथाहमेवैतत्पंचधात्मानं विभज्यैतद्बा
णमवष्टभ्य विधारयामीति प्राणवायोः प्रज्ञात्मत्वं कथमिति चेन्न ज्ञानेंद्रियाश्रयत्वादिति ब्रूमः तस्मा
दुपक्रमादिपर्यालोचनया ब्रह्मरूपैकवाक्यप्रतीतावपि तथा जीवमुख्यप्राणरूपपदार्थप्रतीतिजनकत्वे
न गुणत्वात्पदार्थप्रतीतेश्च तज्जनकतया प्राधान्यात्तदेकवाक्यार्थप्रतीतिसंयोगवाक्यभेद एव न्याय इति

२१

त्यादिदृष्ट्वाध्यासमाह प्रज्ञयेति तयाह्वा वाचं करणं प्रतिनिहितं समारुह्य वक्तेत्यध्यासमनूद्य वाचाक-
रणेन सर्वाणि नामानि वक्तृत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं दृष्टृत्वमनुभवतीत्यर्थः
सर्वभूतविषयकत्वमाह मतिं दृष्ट्वादि संपादकत्वं च बुद्धेर्धर्म इति फलितं चक्षुरेवास्या इत्यादि प-
र्यायांतरार्थोपि संगृहीतः सर्वाध्यासत्वानंदत्वादिर्ब्रह्मधर्म इत्याह तावा इति भूतानि पृथिव्यादीनि
पंचमात्रा अंशशब्दादयः पंच एता दश भूतमात्राः अधिप्रज्ञं प्रज्ञा इंद्रियाणि तद्विषयज्ञानानि वा अधि-
कृत्य प्रवर्तंते दश प्रज्ञामात्राः पंचेंद्रियाणि तद्विषयबुद्धयश्चाधिभूतं भूतानि पृथिव्यादीनि शब्दाद-
ीनि च अधिकृत्य प्रवर्तंते। एवंभूतमात्राणां दशानां ग्राह्यत्वेन प्रज्ञामात्रात्मकग्राहकापेक्षत्वमुक्तं
प्रज्ञामात्राणां दशानां ग्राहकाणां ग्राह्यभूतमात्रापेक्षत्वं वदन्नेवं मिथः सापेक्षत्वं ग्राह्य-
ग्राहकयोः साधयति यद्धीति तदेव स्पष्टयति न हीति मात्राद्वयं न सिध्यति किंतु ग्राहकादेव
एवं ग्राह्यं विना ग्राहकं न निर्वहतीत्यन्योन्यसापेक्षत्वमित्यर्थः इदं ग्राह्यग्राहकद्वयं वस्तुतो नभि-
न्नमित्याह नो इति किं त्वेकस्मिन्नात्मन्यारोपितमिति शेषः तद्यथेत्यादिकं तद्व्याख्यानं। तस्माद्ब्रह्म-
ण एव धर्मत्रयेणोपासनं एवं किं वा ब्रह्मानुवादेन तदाश्रितोपासनात्रयं नाद्यः ब्रह्मसिद्धत्वेन विधे-
योगात् नापि द्वितीयः वाक्यांतरेण ब्रह्मणोऽज्ञातत्वात् नापि तृतीयः नैकं विवक्षितं अन्यत्रापि मनो-
मयः प्राणशरीर इत्यादावुपाधिधर्मेण ब्रह्मोपासनस्याश्रितत्वादित्यापत्तिर्युज्यते तस्माद्ब्रह्मवाक्य-
मिति इदमेकदेशिमतमयुक्तं तथा हि किं मंत्रोपासनात्रयविशिष्टं ब्रह्म विधेयं उत ब्रह्मविशिष्टोपासनात्रं
ब्रह्मानुवादेनोपासनविधानेक विशेष्यावशीकारादुपास्तीनां मिथः संबंधात्प्रत्युपास्तिविध्याव-

16 ल ल:

२२

तस्याख्यायामसत्युपलभ्यमानगोचरस्याप्येकमंगमदूदुहत्तस्यै नामपरस्तात्प्रतिविहिता भूतमात्रा प्रज्ञया
वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादि जीवधर्मः ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्र-
ज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो
रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः
प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादिर्ब्रह्मधर्मः एतदर्थं स्तु प्राणो हि भूतानामायुरिति श्रु-
त्यंतरेण प्राणस्यायुष्ट्वं सिद्धं जीवनस्य तदधीनत्वात् तस्मात्प्राणस्यैव देहायुष्ट्वापकत्वाद्देहादिकमुत्थाप-
यतीत्युक्थत्वं प्राण एव मायुक्ताम् तत्त्वोक्थत्वं प्राणधर्म इत्यर्थः सहवासः सहोत्क्रांतिश्चेत्युक्ताः ॥ नंतय
मथ शब्दार्थः अस्या जीवाख्यप्रज्ञायाः संबंधीनि भूत्वा सर्वाणि भूतानि तदृशात्वेन कल्पितानि वस्तुतो
यथैकं भवति तथा तद्वेत्युच्यता ख्यायामस्त्युप ऋभ्यां ऋ नागेति बुद्धेः साभासायाः स्वरूपतो ज्ञातत्वे
पि विषयित्वरूपपूर्णशरीरस्य सिद्धिः प्रमाभ्यंतरनामप्रपंचविषयित्वमर्धशरीरं बुद्धेरहंकारलक्षणायाः
तथा रूपप्रपंचविषयित्वमर्धशरीरं तया चक्षुरादिषु मध्ये वागेवास्याः प्रज्ञाया रेहार्धमेकमंगमदूदुहत्
उद्देचत्तवती पूर्वाभासेत्यर्थः नामात्मकप्रपंचे वागिंद्रियाविष्टा बुद्धिर्नामप्रपंचविषयित्वलक्षणमर्धशरी-
रमाप्नोतीति यावत् तस्याः प्रज्ञायाः पुनर्नाम नामकत्वपरस्तादपरभागे रूपप्रपंचविषयित्वलक्षणेऽर्धशरी-
रे चक्षुरादिना प्रतिविहिता समुपस्थापिता भूतमात्रा रूपार्थरूपाकारणं भवतीत्यर्थः चक्षुरादिनाप्र-
काशितार्थप्रपंचो बुद्धेरितरभागं रूपप्रपंचविषयित्वलक्षणं प्रत्याभासेति यावत् एवं वागिंद्रियेणा-
र्थप्रपंचेन च जीवाख्यप्रज्ञापूर्णविषयित्वलक्षणं शरीरं प्राप्यते ... बुद्धिर्भवतीति सिद्धं तदुपहितचैतन्यद्वारा स्व

यतो ब्रह्मेति विज्ञेयं किं चिन्नास्ति अतो हेयादीनामभावाच्छान्तः सन्नुपासीतेत्यर्थः गुणं विधाय गुणिवि
धित्सया पुंप्रयत्नसाध्योपासनायाः फलमाह अथेति पुरुषो विहितत्युपासकः क्रतुमयः संकल्प
मयस्तत्र हेतुः यथेति ज्ञानं कर्म वा यथास्मिन्देहे स्थितः संकल्पयति तथा तदनुसारेण फलं प
क्रतुं रत्र लभते तेन सो विधिवत्ततः ध्यानं कुर्वीत किं ध्यायेदित्याकांक्षायामाह मनोमय इति विभक्ति
व्यत्ययेन मनोमयं प्राणशरीरं परमात्मानं ध्यायेदित्यर्थः अत्र मनोमयत्वादेः प्रकृतब्रह्मसापेक्ष
त्वनिरपेक्षत्वाभ्यां संशयः किमत्र मनोमयत्वादिगुणकं शारीरं उपास्यत्वेनोच्यते किं वा परमा
त्मेति किमत्र युक्तं शारीर इति कुतः अप्राणो ह्यमनाः शुभ्र इत्यादिना ब्रह्मणो मनआदिसंबंध
निरासाज्जीवस्य मनआदिसंबंधस्य सर्वत्र सिद्धत्वात्तस्मान्मनोमयत्वादेः प्रकृतब्रह्मनिरपेक्षता
५ तद्गुणकः शारीर एवोपास्य इति प्राप्ते ब्रूमः सर्वत्रप्रसिद्धोपदेशात् ॥१॥ अत्र परमेव ब्रह्मोपास्यत्वेन
परिगृह्यते कुतः सर्वत्रप्रसिद्धोपदेशात् सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्म जगत्कारणं तस्यैवात्र सर्वं ख ते
ल्विदमित्यादिनोपदेशादित्यर्थः यदुक्तं मनोमयत्वादि प्रकृतब्रह्मसंबंधीति तन्न मनोमयत्वादेर्विशेष्या
कांक्षायां सर्वं खल्विदं ब्रह्मेति प्रकृतं तदेवात्वेति नापृष्टो जीवः अन्यथा प्रकृतहानप्रसंगात् न च
तदसंभवः सर्वात्मकत्वेन सर्वस्याप्युपपत्तेरिति किं च विवक्षितगुणोपपत्तेश्च ॥२॥ विवक्षिता उपास
नायामुपादेयत्वेनोपदिष्टा ये गुणाः सत्यसंकल्पत्वादयः तेषां ब्रह्मण्येवोपपत्तेरित्यर्थः मनोमयः प्रा
णशरीरो भारूपः सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्वकामः इत्यादिना उपदिष्टा अपि
मनोमयत्वादि जीवस्यासाधारणं तथापि सत्यसंकल्पत्वाद्यनुरोधेन सर्वात्मके ब्रह्मणि मनोमयत्वा

स्यावाक्यभेदस्यदुरपह्नवत्वात्तस्माद्धयाध्यारव्यानमेवरमणीयमितिसिद्धं ।३१। इतिश्रीमद्ब्रह्मसूत्रवृ
त्तौब्रह्मामृतवर्षिण्यांप्रथमस्याध्यायस्यप्रथमःपादः ।१। एवंकारणत्वाद्यन्याप्यास्मिन्पादेसूत्रात्मकत्रि
शता एवंप्रथमेपादेस्पष्टब्रह्मलिङ्गानिवाक्यानिसर्वज्ञसर्वशक्तिजगदुत्पत्तिस्थितिलयकारणब्रह्म
परतयानीतानि कानिचिद्वाक्यान्यस्पष्टब्रह्मलिङ्गानिसंदिह्यमानानिद्वितीयतृतीयपादाभ्यांब्रह्म
परतयानीयंते तत्रद्वितीयपादेप्रायशःउपास्यब्रह्मपराणिविचार्यन्ते तृतीयेज्ञेयपराणीतिविभागः
सर्वत्रप्रसिद्धोपदेशात् ।१। पूर्वस्मिन्पादेसर्वज्ञत्वादिगुणस्यब्रह्मणःसिद्धत्वात्तदुपजीव्योत्तरस्या
स्यानन्तहेतुहेतुमद्भावःसंगतिः पूर्वोत्तरयोःपूर्वाधिकरणेनास्याधिकरणस्यानंतरसंगतिर्यथापूर्वं
जीवादिलिङ्गबाधयाब्रह्मपरत्वमुक्तंब्रह्मलिङ्गवशात्तथेदब्रह्मलिङ्गमस्तिकिंतुब्रह्मणःप्रकरणमे
वतथाचप्रकरणेनत्याज्यलिङ्गस्यबलवत्त्वाज्जीवस्यमनोमयादिलिङ्गमस्तीतितत्परमेवास्त्वि त्वा
तिप्रत्युदाहरणसंगतिः अत्रपादानन्तर्यान्नावान्तरसंगत्यपेक्षेतिसर्वत्राधिकरणेषुसविशेषवाक्यवि
चारत्वेपूर्वोत्तरपक्षयोरुपास्तिरेवफलंपरंतुनिर्विशेषवाक्यविचारत्वेत्रपूर्वपक्षेतदुपास्तिःसिद्ध
न्तेप्रमितिरितिभेदः छांदोग्येश्रूयतेसर्वंखल्विदंब्रह्मतज्जलानितिशान्तउपासीताथखलुक्रतुमयः
पुरुषोयथाक्रतुरस्मिंल्लोकेपुरुषोभवतितथेतःप्रेत्यभवतिसक्रतुंकुर्वीतमनोमयःप्राणशरीरइत्यादि
अस्यार्थःसर्वंजगत्ब्रह्मैवेत्यत्रहेतुमाहतज्जलानिति तस्माज्जायतेइतितज्जं तस्मिंल्लीयतेइतितल्लं तस्मिन्ननि
तिचेष्टतेइतितदनं तज्जंचतल्लंचतदनंचतज्जलान् शब्दयवलोपश्छांदसः इतिशुद्धोहेतोर्यस्मादेवंत
स्मात्सर्वंजगत्ब्रह्मैवेत्यर्थः सक्रतुंकुर्वीतेत्यत्रविहितमुपासनमनूद्यशान्तइत्यंगगुणंविदधाति शान्तइति।

श्रुतिलिंग
वाक्यप्रक
रणस्थान
समाख्या
नांसमवाये
पूर्वबलीय
स्त्वं

२३

यथेत्यादिस्मृतिः कल्पितभेदं दर्शयति अतः कर्मकर्तृव्यपदेशोपपद्यत इत्यर्थः अर्भकौकस्त्वात्तद्व्यपदे
शाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ७ ननु नात्र परमात्मोपास्यः कुतः अर्भकौकस्त्वात् अर्भकं
अल्पं ओकः स्थानं यस्य स अर्भकौकः तस्य भावस्तत्त्वं तस्मादित्यर्थः एष म आत्मान्तर्हृदय इति हृदयरूप
परिच्छिन्नायतनत्वादित्यर्थः किंच तद्व्यपदेशाच्च स्वशब्देनैवैष अणीयान् व्रीहेर्वा यवाद्वेत्याणीयस्त्व
व्यपदेशादाराग्रमात्रो जीव इहोपास्यो न सर्वगतः परमात्मेति चेन्न निचाय्यत्वादेवं एवमर्भकौकस्त्वाणीय
स्त्वादिविशिष्टत्वेन रूपेण परमात्मन इह निचाय्यत्वादुपास्यत्वादित्यर्थः सर्वगतस्याप्यल्पदेशगतत्वं कयाचिद
पेक्षया संगच्छते यथा सकललोकाधीशः परमात्मा श्रीरामचंद्रः अयोध्याधीश इति व्यपदिश्यते एवं शा
लिग्रामे विष्णुबुद्धिवद्धृदयपुंडरीके परमात्मा अर्भकौकस्त्वादिगुणकः उपासनापेक्षया व्यपदिश्यते
नैतावता सर्वगतत्वहानिः तत्र दृष्टान्तः व्योमवदिति यथा सर्वगतमपि व्योम सूचीपाशाद्यवच्छेदेना
र्भकौकोपि अणीयोपि व्यपदिश्यते तद्वदत्रापीत्यर्थः ७ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ८ ननु अ
स्य व्योमवत्सर्वगतत्वे चेतनत्वाविशेषाज्जीववत्सुखदुःखानुभवरूपसंभोगप्राप्तिरिति चेन्न वैशेष्यात्
जीवपरमात्मनोर्यतो विशेषादित्यर्थः जीवः कर्ता भोक्ता धर्माधर्मादिमांश्चेति तस्य सुखदुःखसंबंधो युक्तः
परमात्मा तु तद्विलक्षण इति न तस्य संभोगप्राप्तिरिति विशेषणे वैशेष्यं स्वार्थे ष्यञ् विशेषातिशय
द्योतनार्थो वा न च जीवपरमात्मनोरभेदात् भोक्तृत्वादिवैलक्षण्यमपि न स्यादिति वाच्यं बिंबप्रतिबिंबयोः
परस्परधर्मासांकर्यस्य बालैः सिद्धत्वादिति तस्मान्मनोमयत्वादिगुणकः परमात्मैवोपास्यो न शारीर
इति सिद्धं अत्ता चराचरग्रहणात् पूर्वं ब्रह्मणो भोक्तृत्वाभाव उक्ते तर्हि तद्वदत्तृत्वमपि जीवस्यैव न ब्रह्मण इ

२३

श्चुपपत्तिः जीवधर्माणां ब्रह्मण्यदर्शयति च श्रुतिः त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दं-
डेन वंचसि त्वं जातो भवसि विश्वतोमुख इति जीर्णोऽस्थविरो भूत्वा यो दंडेन वंचसि गच्छसि सोऽपि त्वमेवेत्य-
र्थः। अप्राण इत्यादि श्रुतिस्तु निर्गुणब्रह्मविषये त्यविरोधः॥२॥ एवं सत्यसंकल्पत्वादीनां ब्रह्मण्युपपत्ति-
मुक्त्वा जीवे तेषामनुपपत्तिमाह अनुपपत्तेस्तु न शारीरः॥३॥ तु शब्दोऽवधारणार्थः अत्र मनोमयत्वा-
दिगुणकं ब्रह्मैवोपास्यं न तु शारीरः कुतः अनुपपत्तेः सत्यसंकल्पत्वादीनां जीवे आंजस्येनानुपपत्तेरि-
त्यर्थः॥३॥ शारीरस्य मनोमयत्वादिगुणकत्वाभावे हेत्वन्तरमाह कर्मकर्तृव्यपदेशाच्च॥४॥ न शारीर
इत्यनुषंगः न शारीरो मनोमयत्वादिगुणक उपास्यः कुतः कर्मकर्तृव्यपदेशात् एतमितः प्रेत्याभि-
संभवितास्मीति एतमिति प्रकृतं मनोमयत्वादिगुणकमुपास्यं कर्मत्वेन व्यपदिशति अभिसंभवि-
तास्मि प्राप्तास्मीति शारीरमुपासकं कर्तृत्वेन व्यपदिशति न च सत्यां गतावेकस्मिन् शारीरे कर्मकर्तृभा-
व आंजस्येनोपपद्यते तस्मान्न शारीर उपास्यः॥४॥ किंच शब्दविशेषात्॥५॥ मनोमयत्वादिगुणः पर-
मात्मैव न शारीरः कुतः शब्दविशेषात् मनोमयत्वादिविशिष्टपरमात्माभिधायकस्य प्रथमांतपूरुष-
सत्वादित्यर्थः तथाहि समानप्रकरणे व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतंडुलो वा एवमंतरात्मन् पु-
मय
रुषो हिरण्मय इत्यादौ पुरुषो हिरण्मय इति प्रथमांतशब्देन परमात्माभिधानं अंतरात्मन्निति सप्त-
म्यंतेन शारीराभिधानं हृत्स्मितीरादिप्रथमांतत्वेन श्रुतो मनोमय इत्यादिशब्दः परमात्मपर एवेति
शानेनु कर्मकर्तृव्यपदेशो न संभवति जीवब्रह्मणोर्भेदादित्याशंक्याह स्मृतेश्च॥६॥ स्मृतिवशाज्जीव-
परमात्मनोर्भेद इत्यर्थः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मा

भिन्नजीवज्ञानं फलं सिद्धं तेन निर्गुणब्रह्मज्ञानमिति विभागः। अस्य वाक्यानन्तरं कठवल्लीषूपढ्य
ते ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे। छायातपौ ब्रह्मविदो वदन्ति पंचाग्नयो ये च
त्रिणाचिकेता इति अस्यार्थः ऋतं सत्यमावश्यकं कर्मफलं पिबन्तौ भुंजानौ जीवपरमात्मानौ छत्रिणो
गच्छन्तीतिवदेकस्य जीवस्य भोक्तृत्वेन ब्रह्मणोपि भोक्तृत्वव्यपदेशः सुकृतस्य धर्मस्य कार्ये देहरू
पे लोके वर्त्तमानौ परार्द्धे परस्य ब्रह्मणः अर्द्धस्थानमर्हतीति परार्द्धं हृदयं तस्मिन् परमे श्रेष्ठे या गुहा त
मोलक्षणा तां प्रविश्य स्थितौ छायातपवन्मिथो विरुद्धौ कर्त्तृत्वादितद्विलक्षणत्वाभ्यां तौ ब्रह्मविदः पंचाग्न
यः कर्मिणश्च वदन्ति त्रिणाचिकेतो ग्निश्चितो यैस्ते त्रिणाचिकेतास्तेपि वदन्तीत्यर्थः। तत्र संशयः किमि
ह बुद्धिजीवौ निर्द्दिष्टावुत जीवपरमात्मानाविति तत्र बुद्धिजीवाविति प्राप्तं कुतः जीवस्य बुद्धिभिन्नत्वेनज्ञा
नार्थप्रश्नदर्शनात् येयं प्रेते विचिकित्सा मनुष्येस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्व
याहं वराणामेष वरस्तृतीय इति मनुष्ये प्रेते मृते सति येयं विचिकित्सा संशयः परलोकगामी भोक्ता
जीवोस्तीत्येके नास्तीति चान्ये अतस्त्वयोपदिष्टोहमेतन्निर्विचिकित्सं तत्त्वं ज्ञातुमिच्छामीति मृत्युं प्रति न
चिकेतसो वचनमिति वराणां नचिकेता मृत्युं वरत्रयं प्रष्टवान् स्वपितुः सौमनस्यमग्निविद्यामात्मवि
द्यां चेति तेषां वराणां मध्ये एष तृतीयो वर इत्यर्थः। एवं च बुद्धिजीवयोः प्रष्टव्यत्वादत्र निर्द्दिश्येते
किंच गुहाप्रवेशस्य बुद्धिजीवयोः संभवादत एतावात्मनावाच्यौ बुद्धिजीवाविति प्राप्ते ब्रूमः गुहां प्रविष्टावात्मा
नौ हि तद्दर्शनात् गुहां प्रविष्टाविह जीवपरमात्मानावेव कुतः आत्मानौ हि यस्मादात्मानौ तस्मादित्य
र्थः। ऋतं पिबन्ताविति कर्मफलभोगश्रवणेनैकस्तावदात्मेति निश्चितो द्वितीयोप्यात्मैव न्याय्यः तत्र हेतुमाह सं

रा

तिदृष्टांतसंगत्यास्यदमायुज्यते अत्र पूर्वपक्षे उपास्तिः फलं सिद्धांते निर्विशेषब्रह्मप्रमितिरिति
विवेकः कठवल्लीषु श्रूयते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था
वेद यत्र स इति अस्यार्थः यस्य परमात्मनो ब्रह्म च क्षत्रं चोभे जातावुपलक्षिते ओदनवदोदनः यस्य मृ
त्युः सर्वमारकः उपसेचनमोदनमिश्रघृतं भवति तत्सर्वस्यात्ता परमात्मा कारणात्मा यत्र वर्त्त
ते तं निर्विशेषमात्मानं नाविरतो दुश्चरितादिति मंत्रोक्तोपायवानन्यथा वेद इत्थमन्य उपायरहि
तो न वेदेति काक्वर्थः अत्रोदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते न च किमग्निरुत जीवः आ
होस्वित्परमात्मेति संशयः त्रयाणामग्निजीवपरमात्मनामेव प्रश्नोपन्यासः संशयबीजं किं तावत्प्राप्तमग्नि
रिति कुतः अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां जीवो वा स्यात् तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः न प
रमात्मेति प्राप्ते ब्रूमः अत्ता चराचरग्रहणात् अत्ताऽस्मिन् भवितुमर्हति कुतः चराचरग्रहणात् चरा
चरयोः स्थावरजंगमयोरद्यत्वेन ग्रहणात् कृत्स्नादित्यर्थः मृत्यूपसेचनत्वेन सर्वप्राणिमात्रस्या
द्यत्वेन प्रतीयमानत्वात् ब्रह्मक्षत्रग्रहणमुपलक्षणार्थं न हि सर्वसंहर्तुः परमात्मनोन्यस्य जीवादेस्स
दा चरात्तृत्वं युक्तं तस्मादत्ताऽत्र परमात्मैवा ॥ प्रकरणाच्च ॥१०॥ इतश्च परमेश्वर एवात्ता कुतः प्रकरणात्प
रमात्मनः प्रकृतत्वादित्यर्थः न जायते म्रियते वा विपश्चिदित्यादिना परमात्मनः प्रकृतत्वात् क
इत्था वेद यत्र स इति च दुर्विज्ञेयत्वं परमात्मलिंगं दृष्टं ॥१०॥ गुहां प्रविष्टावात्मानौ हि
तद्दर्शनात् ॥११॥ पूर्वं ब्रह्मक्षत्रशब्दस्य मृत्यूपदस्य च निर्देशादनित्यवस्तुपरत्ववदिहापि पिबन्तौ द्व
यसन्निहितगुहाप्रवेशादिना बुद्धिदेवयोरपरत्वमस्त्विति दृष्टांतसंगत्यास्यारंभः पूर्वपक्षे बुद्धि

२५ श्व

भावेन आत्मेश्वरयोः समानवृक्षे वृक्षो देहः पुरुषो जीवो निमग्नः मनुष्योऽहमित्यभिनिवेशवाननी
शया अविद्यया मुह्यमानः तत्त्वमजानन् अतिशोचति संसारमनुभवति जुष्टं ध्यानादिना से
वितं यदा तत्पूर्वकर्षदशायामन्यं बिंबभूतमीश्वरं प्रत्यक्त्वेन पश्यति तदा अस्यैवात्मत्वेन दृष्टस्य मह
मानं स्वरूपं प्राप्नोतीति ततश्च वीतशोको भवति तत्र हेतुरितिशब्देनोक्तः बंधहेतोरविद्याया दग्धत्वादित्य
र्थः नह्यविद्याध्वंसानंतरं बंधकस्यानंतपुक्तं नहवा एवंविदि किंचन रजः आध्वंसत इति श्रुतिः रजः अविद्या
स्व विदुषि किंचनरेणुवदपि कल्पितं नाध्वंसते न संपादयति स्वस्यान्वाभौदित्यर्थः तस्मात्पूर्वस्मिन्मंत्रे लिंगश क
रीरयोर्जीवपरयोरेव विशेषितत्वात् भावेव गुहां प्रविष्टाविति जीवत्वादिधर्मविनिर्मुक्तः परमात्मा ज्ञेयर
तिसिद्धं ॥१२॥ अंतर उपपत्तेः ॥१३॥ पूर्वं पिबंताविति प्राथमिकद्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरयोर्गुहानु ह
सामान्यप्रमश्रुत्या गुहाप्रवेशाद्दृष्टानीताः तर्हि तद्देव दृश्यते इति प्राथमिकप्रत्ययस्त्वो नयाः प्रक्षि
प्रतिबिंबात्मावनान्यतरो ग्राह्य इतरमश्रुत्या मनत्वादयः स्तुत्यर्थत्वेन कथंचिन्नेयाः इति दृष्टांतसंगत्या
स्यारंभः पूर्वपक्षे प्रतिबिंबोपास्तिः फलं सिद्धांते ब्रह्मोपास्तिरिति उपकोसलविद्यायां श्रूयते।
२० य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोद
कं वा सिंचति वर्त्मनी एव गच्छतीत्यादि अस्यार्थः पुरुषः परमात्मा दृश्यते शास्त्रतः एष आत्मेति उ
पकोसलंप्रति आचार्योऽवाच प्रतिबिंबात्मकच्छायापाग्यावृत्त्यर्थमाह एतदिति इत्युवाचेत्यन्वयः अक्षि
रूपस्थानस्य ब्रह्मसारूप्यमाह तदिति वर्त्मनी पक्ष्मस्थाने इति द्वितीया द्विवचनं ब्रह्मणो निर्लेपत्वानु
रूपोऽपि निर्लेपत्वात्सारूप्यमित्यर्थः तत्राक्षिण्यंतर उपदिश्यमानः परमात्मा उत प्रतिबिंबादिरिति सं

२५

तद्दर्शनादिति संख्याश्रवणेऽपि संख्यावतोरेकरूपत्वस्य लोके दर्शनादित्यर्थः तद्यथाऽस्य गोर्द्वितीयोऽन्वेष्टव्य
इत्युक्ते गौरेव द्वितीयोऽन्वेष्टव्यः नाश्वो न वा मनुष्यः एवमिहापि चेतनत्वसामान्याज्जीवपरमात्मानावे
व बुद्धिविलक्षणजीवप्रश्नस्यात्यदेवोत्तरं नैतद्वाक्यं नापि गुहाप्रवेशानुपपत्तिः ब्रह्मणः यो वेद निहितं
गुहायामित्यादौ बहुलं गुहाप्रवेशश्रवणान्न चर्तपानानुपपत्तिश्छत्रिन्यायस्य दर्शितत्वादिति तस्माज्जी
वपरमात्मानावेव गुहाप्रविष्टौ ११ विंच विशेषणाच्च १२ जीवपरमात्मनोरेवास्मिन् ग्रंथे गंतृगंत
व्यभावेन मंतृमंतव्यभावेन च विशेषितत्वादित्यर्थः आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिना
नंतरेण ग्रंथेन रथादिरूपकल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गंतारं कल्पयति सोऽध्वनः पारमा
प्नोति तद्विष्णोः परमं पदमिति परमात्मानं गंतव्यं कल्पयति तथा तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्व
रेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति पूर्वस्मिन् ग्रंथे मंतृमंतव्यत्वे
नतावेव विशेषितौ स जीवः अध्वनः संसारमार्गस्य पारमेव विशिनष्टि तदिति आपनशीलस्य ब्रह्म
णः स्वरूपं परमं कार्यकारणातीतं पदं तदेव पारं ज्ञेयं नान्यदित्यर्थः दुर्दर्शं सूक्ष्मत्वाद्दुर्ज्ञानं अतएव गू
ढं अनुप्रविष्टमाच्छादितरूपेण विद्यमानं कुत्रेत्यत आह गुहेति गुहायां बुद्धावाहितं निक्षिप्तं गह्वरे बहु
विधानर्थसंकटे देहे स्थितं पुराणं चिरंतनं तमीश्वरं अध्यात्मयोगः प्रत्यगात्मन्येव चित्तसमाधानं
तत्सहकृताद्वाक्यादधिगमः साक्षात्कारस्तेन सोऽहमेवेति निश्चित्य धीरो विद्वान् हर्षाद्युपलक्षितं संसा
रं जहातीत्यर्थः तथा समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमी
[illegible] शमस्य महिमानमेति वीतशोक इति मंत्रांतरेऽपि जीवपरमात्मानावेव विशिनष्टि मंतृमंतव्य

तस्यैवेशाभिधानादित्यर्थः तथाहि गुरुगृहे ऽप्याचार्याच्च तथा चिरकालं वर्तमानमुपकोसलं गार्हपत्याद्य
ग्नयऊचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्र कंशब्दो वैषयिके सुखे रूढः खंशब्दश्चाकाशे रूढ इति प
रस्परभेदप्राप्तेश्च तिराह यद्वाव कं तदेव खं यदेव खं तदेव कं तदेव कमिति एवं परस्परवैशिष्ट्यप्रति
पादनात्सुखविशिष्टं ब्रह्म वा कोपकोसलेभ्य उक्तमिति तस्यैवात्र ग्रहणमुक्तमिति नाप्रकृतग्रहणं यादृशित्य
क्ष्यंतरः परमात्मा ॥१५॥ किंच श्रुतोपनिषत्कगत्यभिधानाच्च ॥१६॥ इतश्चाक्ष्यंतरः परमात्मा कुतः श्रु
तोपनिषत्कगत्यभिधानात् श्रुता ह्युपस्ताउपनिषद्ब्रह्मविद्या येन सः श्रुतोपनिषत्कः तस्य या गतिरर्चि
रादिरूपा तस्याः प्रकृते ऽभिधानादित्यर्थः अथ योत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्य
मभिजयंते एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तंत इति एतावपि श्रु
तिर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जना इति या गतिर्ब्रह्मविदां द
र्शिता सैवाक्षिपुरुषविदः श्रूयते अथ यदु चैवास्मिञ्छव्यं कुर्वंति यदु च नार्चिषमेवाभिसंभवंतीत्युपक्रम्या ५
दित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः एतान्ब्रह्म गमयतीत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमा
ना इमं मानवमावर्तं नावर्तंत इति तदर्थस्तु अथ देहपातानंतरं ब्रह्मचर्यादितपसा हेतुनात्मानमनुसंधा
य तद्दिध्याध्यानाख्यपाउत्तरमार्गमर्चिराद्युपलक्षितं प्राप्यते नादित्यादिद्वारा कार्यब्रह्म प्राप्नुवंती
त्यर्थः कार्यब्रह्म विशिनष्टि एतदिति व्यष्टिसमस्तेंद्रियाणां समष्ट्यभिमानी हिरण्यगर्भस्थानमित्यर्थः
तस्य चास्तत्वं स्वरूपमाह एतदिति एतद्धि शेषणासिद्ध्यर्थे हेतुमाह एतस्मादिति स्मृतावन्यादिशब्दे रातिवा
हिकास्तदभिमानिन्यो देवता गृह्यंते अर्थेतु कार्ये अस्मिन्नुपासके मृते यदि पुत्रादयः शव्यं शवसंबंधिसं

शयेदृश्यत इति वचनात्सर्वगतस्याक्षिस्थानत्वानुपपत्तेश्च न परमात्मा किंतु प्रतिबिंबादिरिति प्राप्ते ब्रूमः अं
तर उपपत्तेः अंतरः अक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनां निर्देशानां पर
मात्मन्येवोपपत्तेरित्यर्थः नच दृश्यत इत्यनेन विरोधः दर्शनस्य शास्त्रीयत्वेनाविरोधात् किंच एतं सं
यद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वामनीरेष हि सर्वाणि वामानि नयति
एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति इत्यत्र निर्दिष्टसंयद्वामत्वादिगुणानां परमात्मन्येवोपपत्ते
रंतरः परमात्मैव तदर्थमेव संयद्वामशब्दार्थमाह एतं हीति वामानि कर्मफलानि एतमक्षिपुरुषं हेतुमाश्रि
त्याभिसंयंति गच्छंते संयंति वामान्यस्मादिति संयद्वामः सर्वफलोदयहेतुरित्यर्थः वामनीरप्ययमेवेत्या
ह एष उ इति वामनीशब्दार्थमाह [वामनीपदार्थमाह] एष हीति वामनानि शोभनानि जनं प्रापयति जनस्य
सर्वशुभप्रापकोऽप्ययमेवेत्यर्थः भामनीरप्ययमेवेत्याह एष इति भामनीपदार्थमाह एष हीति भामनीः भा
निनयतीति भामनीः अयमेव सर्वप्रकाशक इत्यर्थः नहि प्रतिबिंबस्यान्यस्य वा एतादृशा गुणाः संभवंति त
स्मादक्ष्यंतरः पुरुषः परमात्मा ॥१३॥ कथं पुनः सर्वगतस्याल्पमक्षिस्थानं व्यपदिश्यत इत्यत्रोत्तरं पठति ॥ स्था
नादिव्यपदेशाच्च ॥१४॥ ईश्वरस्याल्पस्थानादिव्यपदेशो नानुपपन्नः कुतः स्थानादिव्यपदेशात् यश्चक्षु
षि तिष्ठन्नित्यादौ ईश्वरस्य चक्षुःस्थानव्यपदेशस्य दृष्टत्वादित्यर्थः आदिपदेन रूपवत्त्वपरिग्रहो दृष्टांत
त्वेनोक्तः हिरण्यश्मश्रुरित्यादौ रूपवत्त्वस्योपासनार्थत्वेनोपादानादिहाप्युपासनार्थमल्पस्थानव्यपदे
शान विरुध्यत इति भावः ॥१४॥ अपि च सुखविशिष्टाभिधानादेव च ॥१५॥ अक्षिपुरुषः परमात्मैवापदिश्यते
कुतः सुखविशिष्टाभिधानात् एवकारेणानात्र संशयः कार्य इति सूच्यते सुखविशिष्टब्रह्मवाक्योपक्रमे श्रूयते

ग्नातोऽभिधीयते य इमं च लोकं परं च लोकं सर्वाणि भूतानि योंऽतरो यमयतीत्युपक्रम्य यः पृथिव्यां तिष्ठन्पृ
थिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृत इ
त्यादि। अत्र पृथिव्यां तिष्ठन्नंतर्यामीत्युक्ते स्थावरादि इति शंकां वारयति। पृथिव्या इति। तदभिमानिदेवता
प्रत्याह यमिति अशरीरस्य कथं नियंतृत्वमित्यत आह यस्येति नियम्य कार्यकारणसंघाते नैव नि
यंतृत्वमिति फलितमाह य इति तस्याभिन्नत्वभ्रमं वारयति एष इति ते मम चेत्यर्थः एवं यः पृथिव्यां तिष्ठ
न्नित्याद्यधिदेवतानंतरं यः सर्वेषु लोकेष्वित्यधिलोकं यः सर्वेषु वेदेष्वित्यधिवेदं यः सर्वेषु यज्ञेषु इत्यधि
यज्ञं यः सर्वेषु भूतेष्वित्यधिभूतं यः प्राणेष्वित्यादि य आत्मनीत्यंतमध्यात्मं च कश्चिदंतरवस्थितो यम
यितान्तर्यामी श्रूयते स किमधिदेवाद्यभिमानी देवतात्मा किं वा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी किं वा परमात्मे मा
ति संशयः किं तावत्प्राप्तं देवतात्मेति कुतः पृथिव्येव यस्यायतनं अग्निर्लोको मनो ज्योतिरित्यादिना कार्य
कारणसंघातस्य देवतात्मकत्वेन तस्या नियंतृत्वोपपत्तेः यस्य देवस्य पृथिवी आयतनं शरीरं अग्निर्लो
कः लोकयतेऽनेन रूपादि इति लोकश्चक्षुः ज्योतिरेव मनन इत्यर्थः न ह्यशरीरस्य नियंतृत्वं युक्तं तद्देवता त्मा
त्मा योगी वा इति प्राप्ते ब्रूमः अंतर्याम्यधिदेवादिषु तद्धर्मव्यपदेशात् अधिदेवादिषु श्रूयमाणोंऽतर्यामी पर
मात्मैव कुतः तद्धर्मव्यपदेशात् तस्य परमात्मनो धर्माणामिह व्यपदेशादित्यर्थः सर्वांतर्यामित्वमात्मत्व
ममृतत्वमद्रष्टृत्वं चेह परमात्मनोऽसाधारणधर्मा उदाहृतवाक्ये दृष्टव्याः न चाशरीरस्य कथं नियंतृत्वमिति
वाच्यं नियम्यशरीरेणैव नियंतृत्वोपपत्तेरिति। १८। ननु प्रधानमेतदंतर्याम्यस्त्वित्याशंक्याह। न च स्मार्त
मतद्धर्माभिलापात् १९ स्मार्तं सांख्यस्मृतिकल्पितं प्रधानं नांतर्यामिशब्दवाच्यं कुतः अतद्धर्माभिला

ष्कारादिनमेवमुपैति यदि वा न कुर्वंति तु मयप्यामः प्रतिहतोपास्तिफलात्तेऽपि सका अर्चिरादिगमिमा
नितो देवतां प्राप्नुवंति अर्चिषोऽहर्देवतां ततः शुक्लपक्षदेवतां ततः षण्मासोपलक्षितोत्तरायणदेवतां
ततः संवत्सरदेवतां तत आदित्यं ततश्चंद्रं ततो विद्युतं प्राप्नुवंति तत्र स्थितानुपासकान् ब्रह्मलोकात्
गत्वा मानवः मनुष्यो वानुत्पन्नः ब्रह्मलोकमेव इति यावत् स पुरुषो गमयतीत्यर्थः कार्यब्रह्म गमयति प्राप
यतीति अर्चिरादिदेवैर्नेतव्यमिरूपलक्षितत्वादेवपथः गंतव्यत्वेन ब्रह्मलोकोपलक्षितत्वाद्ब्रह्मपथश्च एतेन प
था कार्यब्रह्म प्रतिपद्यमानाः पुनरिमं मानवं मनोः सर्गं जन्ममरणप्रवाहं निपुनरावर्तंते रूपं नावर्तंते न प्रवि
शंति तस्मादक्षिपुरुषः परमात्मा ॥१६॥ इतश्चाक्षिपुरुषः परमात्मा नान्यः विंबात्मेत्याह अनवस्थितेरसंभवा ति॰
च्च नेतरः ॥१७॥ तथाहि यदा कश्चित्पुरुषो नेत्रनिकटे तिष्ठति तदानीमेव तस्य छाया नेत्रे दृश्यते न सर्वदा
व इति छायायाः अनवस्थितत्वात् जीवस्य गंधरसादिग्रहणसमये घ्राणादिषु सन्निहितत्वेन नेत्रे सन्निधानाभा
वादनवस्थितत्वमेव अमृतत्वादीनां छायाजीवयोरसंभवः स्पष्ट एवेत्यतः छायापुरुषादिरक्षिगत इ
ति न युक्तं कुतः अनवस्थितेः उपासकस्य सर्वत्राक्षिणि छायासंपादकविंबभूतपुरुषान्तरस्यानवस्था
नादित्यर्थः असंभवाच्च अमृतत्वादिगुणानां छायापुरुषे असंभवादित्यर्थः तस्मात्परमात्मैवाक्षि
स्थानेनोपास्य इति सिद्धं ॥१७॥ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥१८॥ पूर्वं स्थानादिव्यपदेशाच्चे
ति सूत्रे यः पृथिव्यां तिष्ठन्नित्याद्यंतर्यामिब्राह्मणस्थं यः अप्सु तिष्ठन्नित्यादिवाक्यमंतर्यामिलिंगवत्त्वं
सिद्धवत्कृत्योदाहृतं तदाक्षिप्य समाधीयत इत्यासंगत्या इदमारभ्यते पूर्वपक्षे यत्परं तद्वाक्यं नो २
पतेतदुपास्तिः फलं सर्वत्र सविशेषविचारे द्रष्टव्यं सिद्धांते ब्रह्मोपास्तिरेवेतीहापि फलं द्रष्टव्यं अंतर्यामि

अमूर्तः निरवयवः पुरुषः पूर्णः बाह्यं कार्यं अभ्यंतरं कारणं ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वे
न तिष्ठतीति स बाह्याभ्यंतरः सर्वकल्पनाधिष्ठानमिति यावत् अजः कूटस्थः न ह्येतादृशवि
शेषणानि अव्यक्ते जीवे वा संभवंतीति तस्मात्परमात्मैव भूतयोनिः २२ रूपोपन्यासाच्च ॥२३॥ किंच भू
तयोनिः परमात्मैव नेतरावित्यनुषंगः कुतः रूपोपन्यासात् रूपं सर्वविकारात्मकं शरीरं तस्योप
न्यासादित्यर्थः अक्षरात्परतः इत्यस्यानंतरमेतस्माज्जायते प्राण इत्यादिना प्राणादिपृथिव्यंतानां
सृष्टिमुक्त्वा तस्यैव भूतयोनेः सर्वकार्यात्मकं रूपमुपन्यस्यति अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिशः
श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मेति अ
ग्निर्द्युलोकः असौ वाव द्युलोको गौतमाग्निरिति श्रुतेः विवृता वेदाः वागित्यन्वयः पद्भ्यामिति
प्रथमार्थे पादौ पृथिवी यस्यैतादृशं शरीरं एष सर्वभूतानामंतरात्मेत्यर्थः न ह्येतादृशरूपोपन्या
सो जीवाव्यक्तयोः परिमितयोः घटते परमात्मनस्तु सर्वात्मकत्वात्संयुज्यते अस्य सूत्रस्य वृत्तिकार
मतरीत्यायमर्थः प्रदर्शितः शंकरभगवत्पादास्तु अग्निर्मूर्धेति वाक्यस्य जायमानमध्यपाताज्जा
यमानहिरण्यगर्भरूपसूत्रात्मपरत्वं न परमात्मपरत्वमिति वदंति तथाहि एतस्माज्जायते प्राणो म
नः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति पूर्वं प्राणादीनां सृष्टिरुक्ता त
थोत्तरत्रापि तस्मादग्निः समिधो यस्य सूर्य इति यस्य द्युलोकादेः सूर्यः समिधोग्नेर्दिवभासकः यद
अग्निर्द्युलोकः यस्य सूर्य एव समिधस्तस्यादित्य एव समिदिति श्रुतेः सोऽपि तस्मादेव जायत इत्यर्थः
एवं पूर्वमुत्तरत्र च जायमानानां निर्दिष्टत्वादग्निर्मूर्धेति वाक्यं जायमानहिरण्यगर्भमेव जायमान

गर्भे

वस्तुविद्याधिकारं दर्शयति परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञाना-
र्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति अयमर्थः ध्रुवं तेन चेतीति ध्रुवाः विनाशिनः
तत्प्रसिद्धो हि प्रायः अत एवाक्षराः केते यज्ञरूपाः यज्ञोरूपमुपाधिर्येषां ते तथा ऋत्विगादयोऽष्टादश ऋ-
तुयुपा ज्ञेतीति ऋत्विजः षोडश यज्ञोपाधिकाः तदन्यपत्नीयजमानश्च यज्ञोपाधिकौ एवमष्टादश यज्ञ-
रूपाः क्षयिफलकत्वादवरं जघन्यं कर्म येषु श्रुत्याविहितमत्र देवकर्म श्रेयो हेतुर्नैव सम्पूर्यते इति ये मूढाह-
ष्यन्ति ते पुनर्जरापूर्वं मरणमेवाप्नुवन्तीत्यर्थः कर्मजन्यान् लोकान् प्रत्यक्षादिना अनित्यतया परीक्ष्य ज्ञा-
त्वा निर्वेदं वैराग्यमायात् गच्छेत् कथं नास्त्यकृतो मोक्षः कृतेन कर्मणा अहं तु नित्यफलार्थी तस्मात् किं क-
र्मणेति विरक्तः सन् तस्य ब्रह्मणो ज्ञानार्थं गुरुपादोपसर्पणं कुर्यान्न तत्त्वा मुक्तिसाधनतत्त्वज्ञानाय श्रवणा-
दि कुर्यादित्यर्थः रिक्तहस्तो नोपेयाद्राजानं देवतां गुरुमित्यादिना रिक्तहस्तस्य निषिद्धत्वात् समित्पाणि-
रित्युक्तं श्रोत्रियमित्यादिना अध्ययनहीनस्य ब्रह्मनिष्ठो गुरुत्वं वार्यते कर्महीनं दृष्ट्या ततो विरक्तोऽधिकारी
इत्यक्षरविद्या ब्रह्मविद्येति फलितं तस्माददृश्यत्वादिगुणकः परमात्मा ॥२१॥ अपि च। विशेषणभेदव्य-
पदेशाभ्यां च नेतरौ ॥२२॥ अदृश्यत्वादिगुणकः परमात्मैव न नेतरौ प्रधानजीवौ कुतः विशेषणभेदाद्दि-
व्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्र इत्यादिना दिव्यत्वादिविशेषणात् अभेदवर्णना-
दित्यर्थः प्रधाननिरासे हेत्वन्तरमाह भेदेति अक्षरात्परतः पर इति प्रपञ्चोपादानस्याव्याकृतस्याक्ष-
रप्राप्ति भूतस्य भूतप्रकृत्यविरुद्धस्य जडस्य परमात्मनश्च भेदेन व्यपदिष्टत्वादित्यर्थः अव्याकृतस्याक्षर-
त्वं स्वकार्यव्यापित्वेन परत्वं स्वविकारापेक्षयेति द्रष्टव्यं दिव्य इत्यादेरयमर्थः दिव्यः स्वयंज्योतिः

यं

सा

संश्रूयते न भूतयोनेरिति चेन्न येनाक्षरं ६

तेचक्षुःश्रोत्रे यस्य तत्तथाऽदेचक्षुर्ज्ञानेंद्रियैर्हितं तत्कर्मेंद्रियाभावमाह तदिति पाणिश्च पादश्च पाणि
पादं तद्यस्य नास्ति तत्तथा उपलक्षणमिदं कर्मेंद्रियाणां नित्यमनाशोपलक्षितं विभुं प्रभुं सर्वगतं
सर्वकल्पनाधिष्ठानं सुसूक्ष्मं दुर्ज्ञानत्वात् तदव्ययं नाशाभावात् यद्यथोक्तमक्षरं भूतयोनिं यथा
परिपश्यंति धीराः सा परा विद्येत्यन्वयः तत्र संशयः किमदृश्यत्वादिगुणको भूतयोनिः प्रधानं वा शारी
रो वा परमात्मा वेति अदृश्यत्वादीनां प्रधाने संभवात् प्रधानमिति प्राप्ते ब्रूमः अदृश्यत्वादिगुणको भू
तयोनिः परमात्मैव कुतः धर्मोक्तेः यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं
च जायत इतीश्वरधर्मस्य सर्वज्ञत्वादेर्भूतयोनौ निर्देशादित्यर्थः सामान्यतः सर्वज्ञत्वं विशेषतः सर्ववित्त्वं यस्य ज्ञा
नमेव तपः तस्मादीश्वरादेतत्कार्यरूपं ब्रह्म हिरण्यगर्भः सूक्ष्मभूतात्मकं नाम स्थूलभूतात्मकं रूपं च व्रीहि
यवादि सर्वं भौतिकमन्नं च जायत इत्यर्थः नन्वक्षरात्परतः पर इत्यक्षराद्भूतयोनेः परस्येश्वरस्य सर्वज्ञपुरुष
सत्यं वेदें [illegible] मुपसन्नाय शांताय प्रोवाचाचार्यः प्रवृत्यादिस्युपक्रम्याक्षरात्परतः पर इत्युच्यमा
नः परो न भूतयोनेरतिरिच्यते किंत्वक्षरादित्यविद्यानिर्देशः ततः पर इति न विरोधः किं च विषयवाक्येऽक्ष
रात्मकभूतयोनेर्विद्यायाः परत्वं श्रूयमाणं भूतयोनेर्ब्रह्मत्वं गमयति नहि ब्रह्मविद्यातोऽन्या विद्या परा भवितुं
युक्ता मोक्षफलकत्वा [illegible] त्म कपरत्वस्य ब्रह्मविद्याया एव संभवाद्ब्रह्मविद्योपक्रमे श्रूयमाणामपरवि
द्यां ऋग्वेदादिलक्षणां कर्मविद्यामनित्यफलकत्वेन निंदति च नित्यफलकब्रह्मविद्याप्रशंसायै तस्मात्
रविषयमक्षरं भूतयोनिर्ब्रह्मैव निंदा हि श्रूयते प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं ये
षु कर्म एतच्छ्रेयो येऽभिनंदति मूढा जरामृत्युं ते पुनरेवापि यंतीति निंदित्वा च कर्मविद्यां ततो विरक्तस्य
ब्रह्मविद्याभितियेन ज्ञानेनाक्षरं च [illegible] तयोनिं [illegible] सर्वज्ञपुरुषं सत्यं वेद तां ब्रह्मविद्यां ७
ते

प्रोवाचतां तत्वतो

२५

द्यावि

पात् तच्छब्देन प्रधानमुच्यते न तत् अतत् प्रधानभिन्नः परमात्मेत्यर्थः तस्यैव चेतनस्य ये धर्मा द्रष्टृत्वा
द्यस्तेषामभिलापात् अभिधानादित्यर्थः अदृष्टो द्रष्टाश्रुतः श्रोता मतो मन्ता विज्ञातो विज्ञातेति
वाक्यशेषे द्रष्टृत्वादयश्चेतनधर्माः श्रूयन्ते इति नाचेतनं प्रधानमन्तर्यामीत्यर्थः ॥१९॥ तर्हि चेतनो जी
वो योगी भवत्वन्तर्यामीत्यत आह शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥२०॥ शारीरो नान्तर्यामीति
नकारस्य पूर्वसूत्रादनुषङ्गः कस्मात् उभयेऽपि हि काण्वा माध्यन्दिनाश्चान्तर्यामिणो भेदेनैनं शारी
रं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते यो विज्ञाने तिष्ठन्निति काण्वा विज्ञानपदं जी
वपरं य आत्मनि तिष्ठन्निति माध्यन्दिनाः तस्मात्पृथिव्यादिवन्नियम्यत्वमेव जीवस्य न नियन्तृत्वं भेदे
नैवमधीयतेऽतिपादे यो विज्ञाने तिष्ठन्नित्यादिना प्रकारेणेत्यर्थो बोध्यः तस्मादधिदैवादिष्वन्तर्या
ति मीपरमात्मेति सिद्धं ॥२०॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥२१॥ पूर्वं प्रधानविरोधि द्रष्टृत्वादिधर्मवशा
न्न प्रधानमन्तर्यामीत्युक्तं तर्हि तद्विरोधिधर्माणामश्रवणात्प्रधानमेवादृश्यत्वादिगुणको भूत
योनिः स्यादिति प्रत्युदाहरणसङ्गत्यास्यारम्भः आथर्वणे वाक्यमाम्नायते अथ परा यया तदक्षरम
धिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इत्यादि अस्यार्थः पूर्वमपरा ऋग्वेदादिलक्षणा विद्योक्ता
तदनन्तरमथशब्दार्थः यया तदक्षरमधिगम्यते सा परा उत्कृष्टफलका विद्येत्यर्थः अक्षरस्य वर्ण
समुदायत्वं वारयति यदिति अद्रेश्यं अदृश्यं ज्ञानेन्द्रियागम्यं अग्राह्यं कर्मेन्द्रियाविषयः अगोत्रं
वंशशून्यं अवर्णं जातिहीनं न केवलमिन्द्रियाविषयः किन्तु तद्रहितं चेत्याह अचक्षुरिति नविद्य

३०

कैकेयराजमश्वपतिमागत्योचुः आत्मानमित्यादि संप्रत्यध्येषि स वेदाध्यापयसि स त्वं कैकेयराजः
द्युलोकसूर्यवाय्वाकाशवारिपृथिवीनां मध्ये द्युलोकादिरेकैक एव वैश्वानर इति मीमांसाकाले
विवदमानाः प्राचीनशालादयः षड् ऋषयो मत्समीपमागता इति ज्ञात्वा तादृशविपरीतबुद्धिनि-
रासेन सम्यग्वैश्वानरबुद्धिजिज्ञासया तानेव पप्रच्छ औपमन्यव कं त्वमात्मानमुपास्स इत्यादि थ
नाप्रष्टा प्रश्नं ततस्तेष्वेकैकशः द्युलोक एव वैश्वानर इत्युवाच अन्यस्तु सूर्यो वैश्वानर इत्येवं क्रमेण
पृथिवीपर्यंतमेकैकस्य वैश्वानरत्वमुक्त्वा तेषां द्युसूर्यादीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथ-
ग्वर्त्मात्मत्वबहुलत्वरयित्वपादत्वगुणयोगं विधाय प्रत्येकं वैश्वानरपक्षं मूर्द्धपातांधत्वप्राणो-
त्क्रमणदेहशीर्णताबस्तिभेदपादशोषदोषैर्निंदित्वा तेषामेव द्युसूर्यादीनां वैश्वानरपुरुषं
प्रतिमूर्द्धादिभावमुक्त्वा कृत्स्नां वैश्वानरोपासनामुपदिशति यस्त्वेतमित्यादिना अभिमुखेन
७वि विश्वमभिमीयते जानातीत्यभिमानः तं प्रादेशपरिमाणमुपास्ते यस्तस्य सर्वलोकाद्याप्त्यं फल-
मित्यर्थः लोकान्भोगान् भूतानि तदुपाधयः भोक्तारः स्वयमात्मान इति भेदः न तत्संबंधिफल
25 मन्नशब्दार्थः ध्यानफलमुक्त्वाध्येयमाह तस्येति सुतेजस्त्वं द्यौर्वैश्वानरस्य मूर्द्धा विश्वरूपत्वगुण- गुण
कः सूर्यश्चक्षुः एषमुक्तः एष नीलः इत्यादिश्रुतेर्विश्वरूपत्वं बोध्यं पृथग् नानावर्त्मा गमनमात्मा
स्वभावो यस्य वायोः स तथा नानागतित्वगुणो वायुः प्राणः बहुलत्वगुण आकाशो यस्य संदेहः दे-
हमध्यमित्यर्थः रयिर्धनं तद्गुण आपो यस्य बस्तिः मूत्रस्थानं वै[illegible]श्वानरस्य हो प्राधारत्वं संपादना-
र्थमुर एवेत्यादि एवं सति वैश्वानरशब्दस्य परमात्मनि वैश्वानरोपि मतः पुरुष इत्यादौ जाठरे विश्वस्मा ३०

हिरण्यगर्भस्यात्मनः उत्पत्तिः श्रूयते हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमेति समवर्तत अजायत जातः सन्नीश्व
रतया पाति वै भूव भूतानामस्य कस्मै हिरण्यगर्भाय विधेम परिचरेम सूत्रार्थस्तु भूतयोनिः परमा
त्मैव कुतः पुरुष एवेदं विश्वं कर्मेत्यादिना सार्वात्म्यात्मकरूपोपन्यासादिति सर्वं कर्म तपसाध्यं तपो
ज्ञानं च पुरुष एवेत्यर्थः तस्माददृश्यत्वादिगुणको भूतयोनिः परमात्मा निर्विशेषो ब्रह्मेत्यर्थः इति सिद्धं ॥२३॥
वैश्वानरः साधारणशब्दविशेषात् २४ अत्र रूपोपन्यासप्रसंगात् द्युलोकादेर्वैश्वानरस्य तावि
चार्यते इति प्रसंगसंगतिः यद्वा पूर्ववाक्योपक्रमस्यादृश्यत्वादिसाधारणधर्मस्य वाक्यशेषस्य
सर्वज्ञत्वाद्युत्पादकत्वसविषयत्वमुक्तं तद्वदेवात्रापि उपक्रमस्य साधारणशब्दस्य वाक्यशेषबध्यत्वे
साधारणत्वो तथा प्रसिद्धानुगतो तथा जाठरार्थकत्वमस्त्विति दृष्टान्तसंगतिः को न आत्मा किं ब्रह्मे
त्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्याम्नायते यस्त्वेतमेवं प्रादेशमात्र
मभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा
एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्ति
रेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिः हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाह
वनीय इत्यादि अस्यार्थः आत्मनः संसारित्वार्थं ब्रह्मपदं ब्रह्मणोपरोक्षत्वार्थमात्मपदं प्राची
नशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः समेत्य मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति ते च निश्च
यार्थमुद्दालकमाजग्मुः सोऽपि सम्यक् न वेदेति तेनोद्दालकेन सह वैश्वानरोपास्तिनिश्चयार्थं

दे

तस्माद्वैश्वानरः परमात्मैवेति ॥२४॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चै
नमधीयते ॥२६॥ ननु वैश्वानरो न परमात्मा कुतः शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दो न
परमात्मपरः जाठरादौ रूढत्वात् आदिशब्दाद्धृदयं गार्हपत्य इत्याद्यग्नित्रेताकल्पनं तद्यद्भक्तं प्रथममागच्छेत्तद्धोमी
यमित्यादिना प्राणाहुत्याधारतासंकीर्तनं च गृह्यते एतेभ्यो हेतुभ्यो जाठर एव वैश्वानरः किंच अन्तःप्रतिष्ठानात् पुरु
षेऽन्तःप्रतिष्ठितं वेदेति वैश्वानरस्यान्तःप्रतिष्ठानश्रवणात् इदं च जाठरे संभवति न च द्युमूर्धत्वाद्यनुपपत्तेः श्रुति
सामान्यात्मकभूताग्निपरिग्रहे तस्योपपत्तेः द्युलोकादिसंबंधस्य तस्मिन्मन्त्रान्तरेणावगतत्वात् यो भानुना पृथि
वीं द्यामुतेमामाततान रोदसी अन्तरिक्षमिति मन्त्रः। इमां पृथिवीमुत द्यामपि द्यावापृथिव्यावेव रोदसी यो भानु
ना रूपेण आततान व्याप्तवान् अन्तरिक्षं तयोर्मध्यं चाततान स देवोऽग्निर्द्युलोकाद्यवयवो ध्येय इति मन्त्रार्थः तस्मा
न्न वैश्वानरः परमात्मेति चेन्नायं दोषः कुतः तथा दृष्ट्युपदेशात् तथा जाठररूपेण परमेश्वरस्य दृष्टेरुपासना य
या उपदेशादित्यर्थः मनोमयः प्राणशरीरो भारूप इतिवत् यद्वा तस्मिन् जाठरे परमेश्वरदृष्टेरुपदेशात्मनो तथा
ब्रह्मेत्युपासीतेति वदतीत्यर्थः ननु जाठर एव मुख्यो वैश्वानरोऽस्तु तत्राह असंभवादिति मूर्धैव सुतेजा इत्यादेर्जा
ठरेऽसंभवादित्यर्थः न च भूताग्नौ तत्संभवस्तु तरसूत्रे वक्ष्यते अपि च पुरुषमपि चैनं वैश्वानरं वाजसनेयि
नोऽधीयते स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति
परमेश्वरस्य सर्वात्मकत्वात्पुरुषत्वं च पुरुषेऽन्तःप्रविष्टत्वं च सर्वमप्युपपद्यते पुरुषविधमपि चैनमधीयत इति
पाठेऽप्ययमेवार्थः न हि जाठरस्य पुरुषविधत्वं संभवति परमात्मनस्तूपाध्यर्थं सर्वात्मकत्वादविरुद्धं यथा चैतत्तथा
स्पष्टयिष्यामः संपत्तेरिति सूत्रे ॥२६॥ ननु द्युमूर्धत्वादिवं प्रदर्शितमन्त्रवर्णाद्भूताग्नौ संभवति तच्छरीराया देवताया

२६

१ ॐ अग्निर्भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावग्निसामान्ये वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवना
नामभिश्रीरित्यादावग्निशरीरायां देवतायां च प्रयोगदर्शनात् उपक्रमे च को न आत्मेत्युपक्रमाच्च संश
यः किमत्र वैश्वानरो जाठरः उताग्निसामान्यं उताग्निशरीरा देवता आहोस्विच्छरीरः अथवा परमा
त्मेति अत्यर्थस्तु पुरस्थे पुरस्थाकारे देहे विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिह्नं सूर्यमकृण्व
न् कृतवन्तो देवा तद्दुदयेदितव्यवहारादित्यर्थः वैश्वानरस्याग्न्यभिमानस्य देवस्य सुमतौ शोभनबुद्धौ
वयं स्याम भवेम तद्विषयास्तु मतिर्भवत्वित्यर्थः अत्र हेतुः राजा हीति यस्माद्भुवनानामयं राजा कं सुखहेतु
रभिमुखा श्रीरस्येत्यभिश्रीरीश्वरस्तस्मात्तस्य सुमतौ स्यामेति स्तुतिवाक्यार्थः तत्र जाठरादौ वैश्वानरश
ब्दस्य प्रसिद्धत्वाज्जाठरादिरेव वैश्वानर इति प्राप्ते ब्रूमः वैश्वानरः परमात्मैव कुतः साधारणशब्दविशे
षात् साधारणशब्दयोरपि विशेषः साधारणशब्दविशेषस्तस्मादित्यर्थः जाठराग्निसामान्यतद्देवता
सु साधारणो वैश्वानरशब्दः जीवपरयोः साधारण आत्मशब्दः तयोर्वैश्वानरात्मशब्दयोर्जाठरादौ जीवादौ च साधारण
योरपि सतोः परमात्मपरत्वमेव विशेषो वाक्यते तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादावुक्त
द्युमूर्धत्वादेः सर्वात्मकपरमात्मपरिग्रहेणोपपन्नतरत्वात् तस्माद्वैश्वानरः परमात्मा ।२८। स्मर्यमाणमनुमानं स्या
दिति ।२५। किंच वैश्वानरपदस्य परमात्मपरत्वे स्मर्यमाणं स्मृत्युक्तं रूपं अनुमानं स्यात् अनुमापकं लिङ्गं स्यादित्य
र्थः यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इत्यस्याः स्मृतेः श
रीरात्मकरूपप्रतिपादनपरायाः उदाहृतश्रुतिरेव मूलं मूलान्तरकल्पने मानाभावात् तथा च स्मृतौ परमेश्वरस्यै
वोक्तत्वात् तन्मूलश्रुतौ विद्यमानवैश्वानरशब्दः परमात्मपर एवेति तात्पर्यं सूत्रे इतिशब्दो हेतौ यस्मादेवं लिङ्गमस्ति

27